॥ ओ३म् ॥

अद्यैव कुरु यच्छ्रेयः
वृद्धः सन्किं करिष्यसि ।
स्वगात्राण्यपि भाराय
भवन्ति हि विपर्ययेे॥
(योगवासिष्ठ)

स्मृतेः प्रमोषो वपुषः पराभवो
रतेः क्षयो वाच्छुतिचक्षुषां ग्रहः ।
श्रमस्य योनिर्बलवीर्ययोर्वधो
जरासमो नास्ति शरीरिणां रिपुः ॥
(सौन्दरनन्द - 9/33)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

सत्यनिष्ठा जयेल्लेखनी निर्भया

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत–संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

आत्मानं नियमैस्तैस्तैः
कर्षयित्वा प्रयत्नतः।
प्राप्तये निपुणैर्धर्मो
न सुखाल्लभते सुखम्॥
(वा. रामायण, अरण्य का. - 9/31)

प्रसृतैरिन्द्रियैर्दुःखी तैरेव
नियतैः सुखी।
तस्मादिन्द्रियरूपेभ्यो यच्छेदात्मानमात्मना॥'
(महाभारत, शांति पर्व, २०४/९)

卐 वर्षम्-१३ 卐 अंकः-१९ (३०७) नवदेहली 卐 १ अप्रैलमासः २०२४तः १५ अप्रैलमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८


## हिन्दू-जीवन-दर्शनं देशाय दिशं दातुं सक्षमम्-सुरेशसोनी

रामटेकः (डॉ. रेणुकाबोकारे) कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः हिंदू-धर्म-संस्कृति-मंदिरं, नागपुरम् इत्यनयोः संयुक्त तत्त्वावधाने राष्ट्रियस्वयंसेवकसंघस्य वरिष्ठप्रचारकः, विचारकः, बौद्धिक प्रमुखः ,



तरूण भारतस्य पूर्व संपादकः वैद्यः इत्यस्य स्मृति व्याख्यानं गुरुवारे 21 मार्च 2024 तमे दिनाङ्के संपन्नम्।

स्व मा गो वैद्य स्मृति व्याख्यानस्य प्रथम पुष्पं राष्ट्रीय स्वयंसेवक संघस्य अखिलभारतीयकार्यकारिणी सदस्यः एवंच वरिष्ठप्रचारक-विचारकः श्री सुरेशजीसोनी दत्तवान्।

शेषभागःद्वितीयेपुटे






## पतंजलि-योगपीठे होलीकोत्सवः समाचरितः

हरिद्वारम् पतंजलियोगपीठेन वासंती नवसस्येष्ठी यज्ञेन सह होलीकोत्सवः समाचरितः योगपीठेन आयोजिते होलीकोत्सव कार्यक्रमे मध्य प्रदेशसस्य भूतपूर्व मुख्यमंत्री उमाभारती विशिष्टातिथि रुपेण संस्थिता । कार्यक्रमे स्वामीरामदेवः आचार्यबालकृष्णः पुष्पाणान होलिकां समाचरितवन्तौ । होलीकोत्सव




कार्यक्रमं संबोधयन् स्वामी रामदेवः कथितवान् यत् रामः आगमिष्यति, अधुना रामः आगतः राम राज्यमपि आगमिष्यति। तेन समस्तदेशवासिभिः सहितेभ्यः समुपस्थितेभ्यो जनेभ्यः हार्दिक शुभकामनाः ददता उक्तं यत् भारतीय संस्कृति सदैव विविधतायाम् एकतायाः पर्यायः वर्तते। विशिष्टातिथिः उमा भारती अकथयत् यत् हिंदू धर्मे मान्यता यन्नारायणः नर रूपेण अवतरति परं स्वामी रामदेवस्तु नरान्नारायणः भवितुम् आदर्शं प्रस्तौति। कार्यक्रमे आचार्य बालकृष्णः पतंजलि परिवारेण सह समस्त देशवासिभ्यो होली महोत्सवस्य शुभकामनाः ददत् संदिष्टवान् यत् होली प्रेम, एकता, परस्पर सौहार्दस्य पर्व । एतत् व्यसनान् मुक्तीभूय प्रेम्णा समाचरणीयम्। केमिकल युक्त रसायनानां प्रयोगो न करणीयः, अवसरेस्मिन् पतंजलि योगपीठेन संबद्धाः सर्वाः एकांशिकानाम् एकांश प्रमुखाः, अधिकारिणः, कर्मचारिणः, संयासिनः साध्व्य, सर्वशिक्षण संस्थानानां छात्रच्छात्राः उपस्थिताः आसन्।

## भारतीयज्ञानपरंपरायां संस्कृतम् आधृत्य अनुवादकार्ये अनन्ताः संभावनाः- प्रो. श्रीनिवास बरखेडी

दिल्ली, (अजय कुमार मिश्रा)। केन्द्रीयसंस्कृतविश्वविद्यालय-देहल्याः कुलपतिः प्रो श्रीनिवास वरखेडी सारस्वतसभागारे द्विदिवसीयायापः भारतीयभाषाअनुवाद कार्यशालायाः उद्घाटने अध्यक्षीय भाषणे कथितवान् यत् संस्कृते अनुवादेन संबद्धसंभावनाः बहव्यः सन्ति परम् अत्र ज्ञानेन सह अनुवाद कौशलमपि आवश्यकम् ।




शिक्षाविद् संगोष्ठ्याः मुख्यातिथिः प्रो चांदकिरणसलूजा राष्ट्रियशिक्षानीति -2020 सन्दर्भे कथितवान् यत् अस्यां नीतौ भारतीय भाषाभ्योधिक महत्त्वं दत्तमित्यस्य अनेक कारणानि। नीत्या अनया भाषा गत समरुपता देशस्य सर्वेषु सर्वकारिषु पब्लिक विद्यालयेषु आगच्छेत् यतः भाषा सबल संप्रेषणे शक्तिः कार्यं कुरुते। संस्कृत कविः अनुवादकः अकादम्याः कुलपतिः प्रो बनमालीविश्बालः भारतीय ज्ञान परम्परायामृ अनुवाद स्वरूपं ,लक्षणं विविधतां प्रति व्यापकतया प्रकाशः क्षिप्तः। डा पवनव्यासः मंच संचालनं कृतवान् । प्रो मधुकेश्वर भट्टः अतिथीनां वाचिक स्वागतं कृतवान् कार्यशाला संयोजक प्रो. आर एम नारायण सिन्हा कार्यशाला महत्त्वं प्रकाशितवान्। डा सूर्य प्रसादः धन्यवादज्ञापनमकरोत्। उल्लेखनीयं यत् कार्यशालामस्यां अनुवाद कौशलं शिक्षितुमवगंतुं, केन्द्रीय संस्कृत विश्वविद्यालयः ,जवाहरलाल नेहरू विश्वविद्यालयः, दिल्ली विश्वविद्यालयः ,श्री लाल बहादुर शास्त्री नेशनल संस्कृत विश्वविद्यालयः इत्येषां स्नातकाः शोधार्थिनः छात्राश्च भागम् अगृह्णन्।

# संस्कृतिः केवलं संस्कृतात् एव लभ्यते-डॉ. विपिनकुमारद्विवेदी

वार्ताहर:शशिकान्तः

उत्तरप्रदेशसंस्कृतसंस्थानेन भाषाविभागस्य अन्तर्गतं सञ्चालितस्य ऑनलाइन संस्कृतभाषायोजनायाः अन्तर्गतं सञ्चालितस्य सद्यास्कसरलसंस्कृतसम्भाषणकक्षायां बौद्धिकसत्रस्य आयोजनं कृतम्। उद्घाटनमस्य प्रशिक्षु शिवंतिवारी द्वारा विहितम्। सत्रास्य संचालनं मनोरमा कृतवती। उद्घाटनसम्बोधनकथनं प्रशिक्षक शशिकांतः कृतवान्।



संस्थानगीतिका कुमुदमहोदया द्वारा प्रस्तुता। विनीतः स्वागतगीतं गीतवान्। स्वागतभाषणं अतिथिपरिचयं च प्रशिक्षकः गणेशद्विवेदी दत्तवान्। मुख्यातिथिः संस्कृतप्रेमी, देशभक्तश्च विद्वान् डॉ. विपिनकुमार द्विवेदी इत्ययं कथितवान् यत् सर्वाणि मूल्यानि संस्कृते समाविष्टानि सन्ति। बहुविषयेषु सूचनां दत्त्वा सः उक्तवान् सम्पूर्णा सृष्टिः संस्कृते एव विद्यते। एतत् श्रुत्वा एव सर्वे मुग्धाः सम्मोहिताः च भवन्ति । संस्कृतभाषा न केवलं भारते एव पूज्यते अपितु सम्पूर्णं जगत् तया दर्शितं मार्गम् अनुसरति। सः अवदत् यत् वेदपुराणादिकं संस्कृते एव निहितमस्ति। गर्भधारणात् मृत्युपर्यन्तं सर्वे संस्काराः संस्कृतभाषायामेव अस्माकं कृते उपलभ्यन्ते। गीता इत्यादिषु विषयेषु अपि प्रकाशं क्षिप्तवान्।

प्रशिक्षकान् प्रोत्साहयन् मुख्यातिथिः अवदत् यत् अस्माकं चरित्रं ब्राह्मणेन सदृशं भवेत्, अस्माकं बलं क्षत्रियस्य इव भवेत्, अस्माकं व्यापारः वैश्यस्य इव भवेत्, अस्माकं कर्म शूद्रस्य इव भवेत्। जीवने काश्चन समस्याः उत्पद्यन्ते एव अस्माकं मुखं दुःखदं भवति, तदा संस्कृतभाषायां निहितग्रन्थान् अवलोक्य तेषां दर्शितं मार्गं अनुसरणं कर्तव्यम्। सत्रे प्रशिक्षक विनोद कुमार त्रिपाठी प्रतिभागिभ्यः धन्यवादं दत्तवान्।

प्रशिक्षु हरिवल्लभा महोदय शान्तिमन्त्रं कृतवान् । कार्यक्रमस्य अन्ते प्रशिक्षकः डॉ. सत्यप्रकाश मिश्रः छात्राणां कृते कक्षासम्बद्धाः सूचनाः प्रदत्तवान्, प्रचारार्थं च प्रेरितवान्। कार्यक्रमे विनय श्रीवास्तवः उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकः, प्रो. अधिकारी डॉ. दिनेश मिश्रः, सर्वेक्षिका डॉ. चंद्रकला शाक्यः, प्रशिक्षण प्रमुखः सुधिष्ठ मिश्रः, समन्वयकः धीरज मैठाणी, दिव्य रंजन राधा शर्मा, अनिल गौतमः, संस्थान प्रशिक्षक डॉ. सत्यप्रकाश मिश्रः, विनोद कुमार त्रिपाठी, शशिकांतः, धनंजयः, गणेश दत्त द्विवेदी, इत्यादयः अन्ये शिक्षकाः अन्ये च सामाजिकाः जनाः ऑनलाइनमाध्यमेन उपस्थिताः आसन्।

# श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य प्राकृतभाषाविभागेन समायोजिता व्याख्यानमाला

नवदेहली (डॉ. विनयगुप्ता) । राजधानीक्षेत्रे स्थितस्य सुप्रतिष्ठितस्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य प्राकृतभाषाविभागेन मार्चमासस्य अष्टादशे दिनांके व्याख्यानद्वयस्य आयोजनं जातम्। तत्र कुन्दकुन्दभारतीन्यासेन संस्थापिता 'आचार्यकुन्दकुन्दस्मृतिशौरसेनी-प्राकृतव्याख्यानमाला' इत्यन्तर्गते प्रथमे व्याख्याने मुख्यवक्तृत्वेन समागतानां प्रो. विजयकुमारजैनमहोदयानाम् 'आचार्य कुन्दकुन्द के ग्रन्थों की शौरसेनी-प्राकृत का वैशिष्ट्यश विषयमधिकृत्य विशिष्टं व्याख्यानं जातम्। प्रो.जैनमहोदयैः शौरसेनीप्राकृतस्य स्वरूपं जैनागमे कुन्दकुन्दाचार्यस्य 48 पाहुडग्रन्थानाञ्च वैशिष्ट्यं प्रतिपादितम्। 'आचार्यविद्यानन्दस्मृतिव्याख्यानमाला' इत्यन्तर्गते मुख्यवक्तृत्वेन समागतानां प्रो.धर्मचंद्रजैनमहाभागानां 'प्राकृत-आगम आयारंगसुत्तं का वैशिष्ट्य' विषयमाश्रित्य विशिष्टं व्याख्यानं सञ्जातम्। कार्यक्रमे अस्मान् विश्वविद्यालयस्य कुलपतिनां प्रो.मुरलीमनोहरपाठकानाम् आध्यक्ष्यं तथा च विश्वविद्यालयस्य कुलसचिवानां सान्निध्यञ्च प्राप्तम्। व्याख्यानद्वयस्यास्य कुशलसंयोजनं प्राकृतभाषाविभागाध्यक्षाः प्रो. सुदीपकुमारजैनमहाभागाः कृतवन्तः, सह-संयोजनञ्च तस्यैव विभागीयाचार्यौ प्रो.कल्पनाजैनः डॉ.विकासचौधरी च कृतवन्तौ। व्याख्यानमालायामस्यां दिल्लीस्थभिन्नभिन्नसंस्थानेभ्यः आचार्याः शोधच्छात्राश्च, तथैव विश्वविद्यालयस्य वरिष्ठाचार्याः, आचार्याः, शोधच्छात्राः, छात्राश्च समुपस्थिता आसन्।



# पाणिनिविश्वविद्यालये शास्त्रार्थसभायाः आयोजनं जातम्

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालये मार्चमासस्य त्रयोविंशे दिनाङ्के शास्त्रार्थसभायाः आयोजनं जातम्। अस्यां शास्त्रार्थसभायां देशस्य अधिमान्यः विद्वांसः विद्यार्थिनश्च विभिन्नेषु शास्त्रेषु शास्त्रार्थ प्रस्तुतवन्तः। शास्त्रार्थसभायाः अध्यक्षः वाराणसीस्थकाशीहिंदूविश्वविद्यालयस्य सेवानिवृत्तः, आचार्यः प्रसिद्धः शास्त्रार्थीविद्वान भगवतशरणशुक्लवर्यः आसीत्। तेनोक्तं यत् शास्त्रार्थेन विषयविशेषज्ञतायाः सृजनं, विषये अधिकारः प्रतिपादनक्षमतश्च परिपक्क्वा भवति। मुख्यातिथिः रामकिशोरत्रिपाठीवर्यः ,आचार्यः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी उक्तवान् यत्, काश्याः इयं परम्परा सर्वत्र देशे नानास्थानेषु स्थितेषु विश्वविद्यालयेषु प्रसरिता स्यात्। तदा एव शास्त्रसंरक्षणं भवितुं शक्यते।शास्त्रार्थसभायां, डॉ. संदीपशर्मा, न्यायशास्त्रे, आचार्यः विरुपाक्षजड्डीपालः,उज्जयिनी साहित्यशास्त्रे, डॉ.कार्तिकभागवत, मुम्बई, व्याकरणशास्त्रे शास्त्रार्थ कृतवन्तः। विश्वविद्यालये आयोजितायाः शास्त्रार्थकौशल प्रशिक्षणकार्यशालायाः समापनसत्रे विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः विजयकुमारसीजीवर्यः कथितवान् यत् काश्याः परम्परायाः अवन्तिकायामपि प्रचलनं भवेत्। राजाविक्रमादित्यस्य नवरत्नानि विश्वप्रसिद्धानि सन्ति। पुनः विभिन्नेषु शास्त्रेषु नवरत्नानां निर्माणस्य दायित्वम् अस्माकम् एव । कुलपतिना अस्मिन् अवसरे शास्त्रशिरोमणिसम्मानेन विदुषां सम्मान्नं कृतम्।




संयोजकेन साहित्यविभागप्रमुखेन डॉ. तुलसीदासपरोहामहोदयेन वाचिकस्वागतप्रतिवेदनश्च प्रस्तुतम् । डॉ. गंगाशरणव्यासवर्यः विस्तृतकार्यवृत्तं श्रावितवान्। शास्त्रार्थसभायाः संचालनं डॉ. उपेंद्रभार्गवमहोदयेन, आभारं सहसंयोजकेन डॉ. कृष्णकुमार त्रिपाठीवर्येण कृतम्। एवमेव समापनसत्रस्य संचालनं डॉ. कृष्णकुमारत्रिपाठिनः आभारञ्च डॉ. पूजोपाध्यायमहोदया कृतवती।

# खेलो इंडिया' इत्यस्मिन् एल. बी.एस.विश्वविद्यालयस्य छात्रा तृतीयं स्थानं प्राप्तवति



नवदेहली (डॉ. विनयगुप्ता) । श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य नवदिल्लीनगरस्य योगविभागस्य छात्रा प्रिया यादवः आस्मितामहिलालीगस्य अन्तर्गतं योगासनलीग (राष्ट्रीयस्तर) इत्यस्मिन् तृतीयं स्थानं प्राप्त्वा विश्वविद्यालयाय स्वशिक्षकान् च गौरवम् आनयत। भवद्भ्यः कथयामः यत् क्रीडायां महिलानाम् उत्तमभूमिकायाः कृते श्खेलो इण्डिया महिलालीगश इत्यस्य 'अस्मिता महिलालीग' इति नामाङ्कनं कुर्वन् क्रीडामन्त्री अनुरागसिंहठाकुरः शक्तिरूपा महिलाः सर्वस्तरस्य क्रीडायां भागं ग्रहीतुं आमन्त्रितवान्।

उत्तरप्रदेशस्य अमरोहामण्डले स्थिते श्रीमद्दयानन्दकन्यागुरुकुलमहाविद्यालये 8 मार्चतः 10 मार्चपर्यन्तम् आयोजिते श्अस्मिता महिलालीगश इत्यस्मिन् २९ राज्येभ्यः प्रतिभागिनः स्वप्रतिभाकौशलं प्रदर्शितवन्तः। यत्र वरिष्ठवर्गे पारम्परिकयोगासनस्य आयोजनं तथा कनिष्ठवर्गे कलात्मकैकलयोगासनस्य आयोजनं कृतम्, यस्मिन् प्रतिभागिनः पूर्णशक्त्या विभिन्नयोगासनानाम् अनुसारं भिन्नरूपेण स्वशरीरम् आकारं दातुं प्रयतन्ते स्म।

प्रिया यादवः अस्मिता महिलालीगस्य तृतीयस्थानं प्राप्य किञ्चित् निराशा दृष्टवती, यदा तया सह वार्तालापं जातं तदा सा अवदत् यत् सा अस्मिन् स्थाने सन्तुष्टा नास्ति। आगामिवर्षे प्रथमस्थानं प्राप्तुं इतः परं सज्जतां करिष्यामि। अस्याः उपलब्धेः कृते प्रिया यादवः स्वमातापितरौ, शिक्षकान् च प्रति आभारं प्रकटं करोति।

प्रथमपुटस्य शेषभागः **हिन्दू-जीवन-दर्शनं...**

तेन 'हिन्दू जीवन दर्शनस्य समग्रता' विषये व्याख्यानं दत्तम् । अस्य अध्यक्षता मा. कुलगुरु प्रो. हरेराम त्रिपाठी कृतवान्। हिन्दू धर्म संस्कृति मंदिरस्य अध्यक्षश्री मनोज वाघस्य विशेषेण उपस्थितिरासीत्।

कार्यक्रमस्य आरंभः वैदिक मंत्रोच्चारणेन सह दीप प्रज्ज्वलनेन जातः। प्रास्ताविकं हिन्दू धर्म संस्कृति मंदिरस्य अध्यक्षश्री मनोज वाघः कृतवान्।

विश्वविद्यालयस्य त्रैमासिक वैदर्भी इत्यस्याः २४ तमस्य अंकस्य प्रकाशनं गणमान्य अतिथीनां करकमल द्वारा जातम्। इस त्रैमासिक संपादनं प्रो. मधुसूदन पेन्ना एवं च जनसंपर्क अधिकारी डॉ रेणुका बोकारे द्वारा विहितम्।

मुख्य वक्ता श्री सुरेशजी सोनी हिन्दू जीवन दर्शनं एवं च व्यापकतां प्रति सारगर्भित व्याख्यानं दत्तवान् । स्व भाषणे श्री. सोनी जी उक्तवान् यत् आदरणीयः मा गो वैद्यजिः स्वयं एक विचार। तज्जीवनं राष्ट्राय समर्पितम्।

अस्मद्धिंदू विचारधारा समन्वयस्य वर्तते । भोगमोक्षयोः समन्वयेन वयं स्वार्थपरोपकारौ प्राप्तुं शक्नुमः ।

कुलपतिः प्रो हरेराम त्रिपाठी कथितवान् यत् सोनीजेः जीवन पाथेयं अस्मन्मार्गदर्शनं कुरुते। हिन्दू जीवने भोगमोक्षयोर्द्वंद्वः सूक्ष्म रूपेण समक्षम् आयाति । कार्यक्रमस्य समापनं श्रीपाद अभ्यंकर द्वारा राष्ट्रगानं वंदे मातरमिति गीतम्। कार्यक्रमे आ मा गो वैद्यजेः पुत्र डॉ. मनमोहन वैद्यः, डॉ. राम वैद्यः नागपुरस्य अन्ये सम्मानिताः जनाः बड़ी संख्या में उपस्थिताः । मुक्त दूरस्थ केंद्र सहायकः कुलसचिवः डॉ सुमित कठाले संचालनं कृतवान् स राजेश दामले (सचिव, हिंदू संस्कृति मंदिरम्) धन्यवादं ज्ञापितवान्। डॉ कठालेवर्स्य नेतृत्वे सर्वेषां समन्वयकानां सहयोगेन कार्यक्रमः सफलतापूर्वकं सम्पन्नः।



# सम्पन्नमखिलभारतीयं त्रिदिवसीयं शोधसम्मेलनम्
# श्रीभगवानदास- आदर्शसंस्कृतमहाविद्यालयः, हरिद्वारम्

डॉ0 निरञ्जनमिश्रः

हरिद्वारस्थे श्रीभगवानदास आदर्शसंस्कृतमहाविद्यालये 29–31/03/24 यावत् केन्द्रियसंस्कृतविश्वविद्यालयस्यार्थिकसहयोगेन त्रिदिवसीयमखिलभारतीयशोधसम्मेलनस्यायोजनमासीत्। अस्मिन्शोधसम्मेलने भारतस्यास्य विविधप्रान्तेभ्यो शोधपत्रवाचकानां विशिष्टातिथीनामुपस्थितिरभवत्। सम्मेलनस्यास्य मूलविन्दुरासीत् संस्कृतसाहित्ये जलसंरक्षणम्, भारतीयपाश्चात्यकाव्यशास्त्रस्यानुशीलनम्, पाणिनीयव्याकरणस्य भाषाविज्ञानेन सह तुलनात्मकचिन्तनम्, आधिव्याधि निवारणाय योगस्य महत्ता चेति। समसामयिकविषयाणां चयनमेवास्य सम्मेलनस्यौचित्यं प्रमाणयति।

प्रथमे दिवसे 29/3/24 तालिकायां सम्मेलनस्यास्योद्घाटनावसरे मान्याः प्रो. महाबीरअग्रवालमहोदयाः (प्रतिकुलपतयः पतञ्जलिविश्वविद्यालयस्य) अध्यक्षपदमलंकृतवन्तः। मुख्यातिथिरूपेण दूनविश्वविद्यालयस्य कुलपतयः विदुष्यः प्रो0 सुरेखा डंगवालमहोदयाः उपस्थिता आसन्। विशिष्टातिथित्वेन बिहारप्रदेशस्थनवनालन्दाविश्वविद्यालयस्य आचार्या विभागाध्यक्षाश्च प्रो0 विजयकर्णमहोदयाः, मुख्यवक्तृरूपेण एच.एन.वी. गढवालविश्वविद्यालयस्यांग्लविभागस्य पूर्वविभागाध्यक्षा प्रो. डी.आर.पुरोहितमहोदयाः उपस्थिता आसन्। श्रीगौरवशास्त्रिवर्या अप्युपस्थायास्य सभायाः गौरव वर्धितवन्तः।

वर्तमानकाले जलसंरक्षणस्य महती आवश्यकता वर्तते इति सर्वे जानन्ति। डंगवालमहोदया अस्य






विषयस्य महत्वमावश्यकतां च प्रतिपादयन्ती प्राचीनसंस्कृतसाहित्यादारभ्येदानीं यावत् संस्कृतसाहित्यस्य प्रकृतिरक्षणम्प्रति कटिबद्धतां प्रमाणितवती। जलं विना जीवनस्य कल्पना केवलमाकाशकुसुमचयनमेवास्तीति निश्चप्रचम्। आंग्लभाषायाः विदुषीयं प्रमाणितवती यत् संस्कृतसाहित्यस्य चिन्तनवैशिष्ट्यं कीदृशमासीत्। ऋषीणां प्रकृतिरक्षणम्प्रति या कल्पना आसीत् तस्याः महत्वमिदानीं प्रतीयते। तदनुगुणमेवेदानीमपि करणीयमस्माभिः। अन्यथा यथा जलप्रदूषणं प्रतिपदं वृद्धिं याति तेन भयावहस्थितेरेव परिकल्पना भवितुमर्हति। वस्तुतः महोदयायाः गूढज्ञानं तत्रोपस्थितानां शोधपत्रवाचकानां छात्राणामुपस्थितानां सहृदयानां च किमप्यभिनवज्ञानबर्धनायालमभवत्। इदमेव वस्तुतः सम्मेलनस्य वैशिष्ट्यं भवति ।

वाग्वैदग्ध्यकुशली विजयकर्णमहोदयाः जलसंरक्षणार्थ स्वजीवनस्यानुभवं तथा च कृतकायस्य विवेचनमुपस्थापितवन्तः। तत्कार्यव्यापारे प्राप्तानुभवस्योपस्थापनेन समुपस्थितानां चेतसि जलरक्षणम्प्रति कर्तव्यनिर्वाहस्य काचिन्नवीना सरणिः समुपस्थिताऽभवत्। चिन्तनस्य नियोजनं कथं भवितुमर्हति व्यापारे इति विषयबोधनमावश्यमस्तीदानीमिति मन्ये। तदेव श्रीमता सम्यक्तया प्रतिपादितमतस्तस्यागमनस्य प्रयोजनसिद्धिरभवदिति निश्चितम्

मुख्यवक्तृरूपेणोपस्थिता प्रो0 डी आर पुरोहितमहोदयाः विविधकलाकुशलास्सन्ति। व्यावहारिकजीवने स्वचिन्तनस्य प्रतिफलनं कथं भवति भवितुमर्हति वेति तस्य विशिष्टज्ञानमस्ति। अस्य महोदयस्य भाषणकला तादृशी यया नवोदिता चेतसि काचिदभिनवा प्रतीतिर्जायते। नवाचारस्येयं रमणीया सरणिरस्ति। वस्तुतः यूनां चेतसि शास्त्रीयविषयस्य निवेशनं किमपि विशिष्टं कौशलं भवति। यस्यावश्यकतेदानीं प्रतीयते। तत्सर्वमेतेषां महोदयानामुपस्थित्या समेषामक्षिलक्ष्यभवदिति निश्चितम्।

पुनश्च शोधवाचनसत्रे डॉ0 भोला झा (पूर्वप्राचार्याः श्रीभगवानदास आदर्शसंस्कृतमहाविद्यालयस्य) अध्यक्षपदमलंकृतवन्तः। एच.एन.वी गढवालविश्वविद्यालयस्य संस्कृतविभागस्याध्यक्षाः डॉ0 विश्वेशवाग्मिमहोदयाः मुख्यवक्तृत्वेनोपस्थिता अभवन्। वक्तृरूपेण डॉ. निष्ठासक्सेना महोदया डी.ए.वी.पी.जी.महाव. पंजाबविश्वविद्यालयस्य सहायकाचार्या, डॉ0 प्रीतिवाग्मीमहोदया एचएन.वी.गढवालविश्वविद्यालये संस्कृतविभागे सहायकाचार्या, डॉ. रीनावर्ममहोदया गुरुकुलकाँगडीविश्वविद्यालयस्य देहदादूनस्थकन्यापरिसरस्यांग्लविभागस्य सहायकाचार्या, डॉ0 बलविन्दरकौरमहोदया सहायकाचार्या आंग्गलविभागे पी.जी.कालेज धनौरी रुडकीनगरे, उपस्थिताऽऽसीत्।

समेषां व्याख्यानेन विविधशास्त्रीयप्रमाणपुरस्सरं प्रतिपादितमभवत् यत् जलमेवाद्या सृष्टिः। तद्रक्षणाय वैदिककालादादभ्येदानीं यावत् दैवीभाषायां सततं चिन्तनं कर्तव्यबोधनं वर्णितमस्ति। तत्रावश्यकता वर्तते तच्चिन्तनस्य प्रयोगसाधनाय। यदि केवलं चिन्तनमेव स्यात् तर्हि कस्यापि चिन्तनस्य प्रतिफलनं नैव भवितुमर्हति। अतः ज्ञानं भारं क्रियां विनेति सूक्ति सर्वदा चरितार्था भवति। 'अप एव ससर्जादौ' इति पौराणिकवचनादारभ्य आपो हिष्ठामयोभुवः इत्यादि वैदिकवाक्यानां महाकविकालिदासकृतप्रकृतिवर्गीकरणस्य तत्वनिरूपणपुरस्सरणं मन्मत्वप्रतिपादनादिकं सर्वं सुष्ठुतया संजातम्।

वक्तृभिः नवोदितप्रतिभाभिः वाग्व्यापारेण या विषयबोधनस्य पद्धतिराचरिता तन्नूनमेव रमणीयाभवत्। एतेन केवलं स्ववचनविस्तारणं नाभवदपितु श्रोतृणां चेतसि का भावना वर्तते, तस्याः परिमार्जनं कथं भवितुमर्हति कथं वा तत्स्वीकरणीयं परिमार्जनीयमित्यादीनामप्युपादहरणमभवदेतत् सत्रम्।

अध्यक्षचरणैः समेषां वक्तृणां कथनस्य सारतत्वमादाय रमणीयविषयोपस्थापनं कृतम्। येन सारांशतया सम्पूर्णसत्रस्य विषायावगाहनमभवत्। शास्त्रस्यालोडनप्रत्यालोडनप्रक्रियया यन्नवनीतमवाप्तं तदास्वादस्तु रमणीयतामावहत्येव।

दिनांक 30/3/24 तमे प्रथमे शोधवाचनसत्रे जामिया इस्लामिया विश्वविद्यालयस्य संस्कृतविभागस्याचार्याः प्रो. जयप्रकाशनारायणमहोदयाः अध्यक्षा आसन्। मुख्यवक्तृरूपेण विजयकर्णमहोदयाः वक्तृत्वेन प्रो. नमिताजोशीमहोदया(आचार्या पर्यावरणविज्ञानविभागस्य गुरुकुलकाँगडीविश्वविद्यालयस्य) डॉ0 अर्चना डी त्यागीमहोदया (सहाचार्या आंग्लविभागस्य वी.एस.एम.पी.जी.महाविद्यालयस्य) डॉ. मैत्रेयीकुमारीमहोदया(सहाचार्या कमलानेहरूमहाविद्यालयस्य संस्कृतविभागस्य) डॉ. वेदव्रतमहोदयाः(सहायकाचार्या गुरुकुलकाँगडीविश्वविद्यालयस्य) उपस्थिता अभवन्।

अस्मिन् सत्रे वापी कूप तडागादानीं निर्माणे तद्रक्षणे तत्परिवर्धने विदुषां लेखः केन्द्रित आसीत्। कूप वापी ह्रद नदी इत्यादीनां भिन्नभिन्नरूपेण प्रयोगानुसारं निर्माणमासीत्पूर्वम्। येन वृष्टिजलानां संरक्षणं भवति स्म। तत्रैव स्नानेन जलस्यापव्ययोऽपि नैव भवति स्म। स्नानार्थं जलस्य लोभात् पशूनां पेयजललोभात् कृषिसिञ्चनार्थं जलसंरक्षणलोभात् सामाजिकाः तद्रक्षणं परिवर्धनमपि कुर्वन्ति स्म। तत्रैव मत्स्यपालनेन कतिचनजनानामाजीविकारक्षणमपि भवति स्म। तदभावे इदानीं जलस्य समस्या समुत्पन्नाा जाता। पुनस्तेनैव मार्गेण समाजस्य गमनं वरम्। येन भविष्ये जलसमस्यातो निदानं स्यात्। इत्येव सत्रस्यास्य सारांश अभवत्।

तृतीये सत्रे दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्याचार्याः प्रो. रणजीत बेहरामहोदया अध्यक्षा आसन्। मुख्यवक्तृत्वेन ओमप्रकाशभट्ट महोदयाः पूर्वप्राचार्याः श्रीरामानुजश्रीवैष्णवसंस्कृतमहाविद्यालय हरिद्वारम्, डॉ. ऋचाजोशी सहायकाचार्या आंगलविभागस्य दूनविश्वविद्यालयस्य, डॉ. बबलूवेदालंकारः गुरुकुलकाँगडीविश्वविद्यालयस्य दर्शनविभागस्याचार्या उपस्थिता आसन्।

अस्मिन् सत्रे वर्तमानजलसमस्यायाः निराकरणं वक्तृणां केन्द्रभूतमासीत्। विद्युदुत्पादनब्याजेन नदीनामवरोधनं कदापि समुचितं नास्तीति मतमपि विदुषां मध्ये विचारणीयमभवत्। वस्तुतः नदी न केवलं जलधारा अपितु सा जीवनरक्षिका भवति। तया धारया न केवलं तटगतपादपलतादीनां सिंचनं कृषिभूमिसिंचनं भवति अपितु तयैव पशुधनपालनं वन्यजीवसंरक्षणं प्रकृतिसंरक्षणं चापि भवति। या प्रकृति समस्तजीवजन्तुनः जीवनरक्षिका भवति। अथ च भौतिकभोगविलासस्याधिक्येनापि तन्मलविसर्जनार्थमस्याः धाराया उपयोगादत्र प्रदूषणवृद्धिर्भति। सर्वकारीयपक्षतो भवेत् वा सामाजिकप्रयासाद्भवेत् तदवरोधनमावश्यकमस्ति। यावदस्यावरोधनं न भवति तावत् जलप्रदूषणस्य निवारणमपि नैव भवितुमर्हति। अतः धारायाः निबन्धनमपहायान्योपायेन विद्युल्लाभायान्वेषणस्यावश्यकता वर्तते। सर्वैः कल्याणमार्गस्यावलम्बनमावश्यकमिदानीम्।



31/03/24 दिनांके संस्कृतशास्त्रीयविषयमादाय सम्मेलनस्यारम्भोऽभवत्। अस्मिन् सत्रे स्वनामधन्याः विविधशास्त्रविचक्षणाः प्रो. राधावल्लभत्रिपाठिमहोदयाः (पूर्वकुलपतयः राष्ट्रियसंस्कृतसंस्थानस्य) मुख्यवक्तृत्वेनोपस्थिता आसन्। वक्तृत्वेन प्रो. विजयपालशास्त्रीमहोदयाः आचार्याः साहित्यविभागस्य केन्द्रियसंस्कृतविश्वविद्यालयस्य देवप्रयागपरिसरस्य, प्रो. जयप्रकाशनारायणमहोदयाः आचार्याः संस्कृतविभागस्य जामिया इस्लामिया विश्वविद्यालयस्योपस्थिता आसन्। आध्यक्ष्यं च तत्र प्रो. श्रवणकुमारमहोदयस्य आचार्यचराः आंग्लविभागस्य गुरुकुलकाँगडीविश्वविद्यालयस्यासीत्।

पाश्चात्यार्वाच्यकाव्यशास्त्रीयाचार्याणां परस्परं तुलनात्मकविवेचने प्रो. राधावल्लभत्रिपाठिमहोदयानां तलस्पर्शिव्याख्यानं शोधच्छात्राणां जिज्ञासूनां च महल्लाभायाभवत्। स्वदेशीयाचार्यैस्सह पाश्चात्याचार्याणामपि मतज्ञानं परमावश्यकं भवति येन विश्वस्तरीय तत्वविवेचने लाभः स्यात्। तत्र प्लेटो अरस्तू वर्सवर्थ इत्यादीनां काव्यशास्त्रविषये किं मतं का च तत्राल्पता को नाम तत्र गुणः, किं वा तन्नवीनमित्यादीनां सूक्ष्मविवेचनं सुस्पष्टविवेचनं च रमणीयमभवत्। प्रो. विजयपालशास्त्रिमहोदयाः भाषाविज्ञानस्य तत्वविवेचनं सम्यक्तया कृतवान्। तत्र कतिचनसन्देहानामपि विस्तृतरूपेणोपस्थितिरभवत् समाधानमहादाय जिज्ञासूनां पक्षोपस्थापनमपि रमणीयमभवत्। पारस्परिकशंकासमाधानस्य विशिष्टासरणिः नवीनतामुपस्थापितवती।

अध्यक्षमहोदयः शास्त्राणां महत्वं शास्त्रीयतत्वानां च महत्वं प्रकटितवान्। आंग्लभाषाभाषिणामप्याधारभूतशिला संस्कृतभाषैवास्तीति ज्ञात्वा भारतीयपक्षस्य महत्वप्रतिपादनमभवत् सम्यक्त्या।

समापनसत्रे मुख्यवक्त्वमवहन् डॉ. शैलेशकुमारतिवारी महोदयाः सहाचार्यः व्याकरणविभागस्य उत्तराखण्डसंस्कृतविश्वविद्यालयस्य। पाणिनिव्याकरणभाषाविज्ञानस्य च पारस्परकितुलनात्मकविवेचनं परमप्रमोदावहमभवत् जिज्ञासूना। उभयोर्मध्ये किमन्तरं कथं चान्तरं किं वा पार्थक्यम् कथमुभयोरध्ययनमावश्यकमित्यादीनां विषयाणां सम्यक् प्रतिपादनं कृतं तिवारीवर्येण।

अस्मिन् सत्रे डॉ. वाजश्रवा आर्य(सचिवाः संस्कृतादम्याः संस्कृतशिक्षापरिषदश्च) श्रीपद्माकरमिश्रमहोदयाः निदेशकाः संस्कृतशिक्षानिदेशालयस्य श्रीगौरवशास्त्रिवर्याश्चाप्युपस्थिता आसन्।

अस्यसम्मेलनस्य वैशिष्ट्यमासीत् यत् प्रतिदिनं प्रतिसत्रं विविधविद्यालयेभ्यो महाविद्यालयेभ्यः समागतानां छात्राणां आचायार्णां चोपस्थितिः पर्याप्तमात्रायामासीत्। जिज्ञासूनां सम्मर्द एव सम्मेलनस्य वैशिष्ट्यं वदति स्म। सम्पूर्णसम्मेलनस्यास्य सम्पूर्णसत्रसंयोजनं डॉ. रवीन्द्रकुमार(ब्याकरणविभागे सहायकाचार्य, श्रीभगवानदास संस्कृतमहाविद्यालयः) अथ च डॉ. आशिमाश्रवण(सहायकाचार्या आंग्लविषयस्य श्रीभगवानदास आदर्शसंस्कृतमहाविद्यालयः) मिलित्वा कृतवती। अन्ते प्रभारीप्राचार्यः डॉ. व्रजेन्द्रकुमारसिंहदेवः सम्मेलनस्यास्य संरक्षकानां केन्द्रियसंस्कृतविश्वविद्यालयस्य कुलपतिपर्याणां प्रो. श्रीनिवासवडखेडीमहोदयानां, मार्गदर्शकानां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिपदे प्रतिष्ठितानां प्रो. विबहारीलालशर्म्ममहोदयानां(श्रीभगवानदाससंस्कृतमहाविद्यालयस्य प्रबन्धसमितेरध्यक्षानां)सादरं धन्यवादज्ञापनपुरस्सरं समेषां समागतानां विदुषां शोधच्छात्राणां समुपस्थितानां च विदुषामाचार्याणां धन्यवादज्ञापनं कृतवान्। प्रायः षडविंशतिशोधपत्राणि प्रस्तुतानि। तानि सर्वाणि विषयानुकूलानि तथ्यप्रतिपादकानि चासन्।

अत्र प्रायः प्रतिसत्रमुपस्थिता आसन् डॉ. निरञ्जनमिश्रः डॉ. मञ्जुपटेलः, डॉ. दीपककुमारकोठारी, श्रीप्रमेश विजल्वाणः, डॉ. आलोकसेमवालः, श्री अतुल मैखुरी, श्री विवेकशुक्लः, डॉ. अंकुरकुमारः, श्रीमती स्वाति शर्मा, डॉ. अनिल कुमार त्रिपाठी, डॉ. चन्द्रभूषणशुक्लः, श्री सागरकुमार झा, श्रीवाणीभूषणभट्टः, डॉ. हरीश गुरुरानी, शताधिकाश्च छात्राः।

# सम्पादकीयम्

सम्मानिताः सुजनाः!

असं निजः परो वेति गणना लघुचेतसाम्।
उदारचारितानान्तु वसुधैव कुटुम्बकम्।।

इति या भावना या विश्ववन्द्यया भारतीयसंस्कृतावेव सम्प्राप्यते। अस्यां संस्कृतौ विश्वमेकनीडमपि दुर्लभं वाक्यं लभ्यते। अनेन वाक्येन सम्पूर्णमानवजातिं प्रति यः सन्देशो दीयते असौ अन्यत्र सुदुर्लर्भा वर्तते। भारतीयैकतासाधकं संस्कृतं संस्कृतिमिमां द्रढयति पुष्णाति चेति चिजानन्ति भवन्तः। संस्कृतं संस्कृतिं विना भारतस्य कल्पनमपि चिन्त्यमस्ति। अतएव तु वयं संस्कृतसंवादमाध्यमेन देववाणी सेवामहे। सौभाग्यमस्माकं यत्स्वदेशे अखिलभारतीयप्राच्यविद्यासम्मेलनं पञ्चाशत्तमं नागपुरे कविकुलकालिदाससंस्कृत-विश्वविद्यालये समायोजितम्। यत्र विविधविषयकाणि शोधपत्राणि पठितानि। अनेकेषां विदुषां संस्कृतसेविनां च सम्माननमपि विहितम्। अवश्यमेव अनेन महता समायोजनेन संस्कृतस्य संस्कृतेश्च दर्शनीयो विकासो भविष्यतीति मन्यामहे।

मान्याः! स एव देशो निरन्तरमेधते यत्रत्यं साहित्यं वर्द्धमानं विलोक्यते। वयं सौभाग्यभाजो यदत्रत्यं साहित्यं देशोन्नतये विरच्यते। वयं वाञ्छामो भवतु तादृशं विशिष्टं साहित्यसर्जनं येन बलात्कारिणः दुराचारिणः मृत्युमुखमुपयान्तु सर्वत्र महिलाजनादरो भवतु यतो यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः इति वचनं सार्थकं भवेत्।

अन्ते स्वदेशस्य संस्कृतस्य संस्कृतेश्च समादरं कुर्वती भवती भवतीश्च प्रणमन्ती संस्कृतसंवादस्य शुभं कामयमानास्मि।

भवदीया
सम्पादिका

**॥ वेद वाणी ॥**

'तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ।
अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम् ।।''

'O ! Agni Deva( God of Fire)! Eñtend sacrificial fires- Follow the path of Surya ( Sun God) that radiates the world and enter the solar orb-Protect the high and radiant paths earned through meritorious deeds- Make worshippers' works happy and free from blame- Lett man be a virtuous human like the sages- Let him father heavenly people-'

The Rig Veda 10-53-6

**'बृंहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा।।**
**भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि।।'**

'O most young and mighty Agni Deva ! For the sake of Your devotees, shine even more brilliantly and with great flames of effulgence. Let those who are generous in giving food to people become rich and radiant. Let them reach the highest levels of excellence in life. Bestow on us purity, wealth and enlightenment.'

**The Sama Veda 1.1.4.37 (RV 6.48.7)**

**श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर ।**
**वसो पुरुस्पृहं रयिम् ॥**
**मा नो अरातिरीशत देवस्य मर्त्यस्य च ।**
**पर्षि तस्या उत द्विषः ॥**
**विश्वा उत त्वया वयं धारा उदन्या इव ।**
**अति गाहेमहि द्विषः ॥**

'O! Mighty Agni Deva ( ( Lord of Fire)"You rule all and look after their welfare. You are the greatest and most resplendent of all of divinities, grant us various kinds of desired wealth in abundance. May no enemy whether of gods or men ever rule us.May you also protect us from such enemies. ""May we, through Your favour, overwhelm, overcome and cross , like a flooded water gushing forth, all those enemies that hate us.

**The Rig Veda 2.7.1/2/3**

**संकलन :**
**एस.वासुदेव रावः**

# व्याकरणविनोदविमर्शात्मिका राष्ट्रिया संगोष्ठी सुसम्पन्ना

– डॉ. मणिशंकरद्विवेदी, नवदेहली

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य व्याकरणविभागः एवं श्रीशंकरशिक्षायतनवैदिकशोधसंस्थानम् इत्यनयोः संयुक्ततत्त्वावधाने "व्याकरणविनोदविमर्शः" इति विषयमधिकृत्यश्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्यवाचस्पतिसभागारे मार्चमास्य२२ तमे दिनांकेएकदिवसीयाराष्ट्रिया संगोष्ठी समायोजिता। अस्यां राष्ट्रियसंगोष्ठ्यांविद्यावाचस्पतेः पं.मधुसूदनओझामहोदयस्यव्याकरणविनोदनामकं ग्रन्थमधिकृत्यआमन्त्रितैः विद्वद्भिः व्याख्यानंकृतम्।

व्याकरणविनोदः व्याकरणशास्त्रस्यउत्कृष्टः ग्रन्थः अस्ति।अस्मिन् ग्रन्थे





पं ओझामहोदयः व्याकरणशास्त्रस्य विषयाणांनवीनशैल्यासाधुतया प्रतिपादनं कृतवान्। ग्रन्थोऽयंषट्परिच्छेदे विभक्ताःसन्ति–समासपरिच्छेदः, तद्धितपरिच्छेदः, नामधातुपरिच्छेदः, प्रक्रियापरिच्छेदः, कृदन्तपरिच्छेदः, अव्ययपरिच्छेदश्च।

समासपरिच्छेदः–अस्मिन् परिच्छेदेपञ्च समासाः भेदोपभेदेन सहनिरूपिताः सन्ति।तत्र ये सन्ति– द्विरुक्तसमासः, द्वन्द्वसमासः, अव्ययीभावसमासः, तत्पुरुषःसमास बहुव्रीहिसमासश्च। अस्य परिच्छेदस्य वैशिष्ट्यम् अनेन प्रकारेण ज्ञातुं शक्यते यत् ग्रन्थेऽस्मिन् समासानां निरूपणं समासाश्रयविधिना विहितमस्ति ग्रन्थकारेण। समासाश्रयविधिःअष्टधा विभक्तः अस्ति। तस्य नामानि सन्ति– उपसर्जनविधिः, समासान्तविधिः, विकारादेशः, विभक्तिलोपालोपः, पुंवद्भावः, लिङ्गविधिः, वचनविधिः स्वरविधिश्च।

तद्धितपरिच्छेदः– अस्मिन् परिच्छेदेएते प्रत्ययाः सन्ति– विभक्तिप्रत्ययः, परिच्छिन्नप्रत्ययः, भावकर्मप्रत्ययः, स्त्रीप्रत्ययश्च।

नामधातुपरिच्छेदः–अस्मिन् परिच्छेदे तदिच्छा, तद्विचारः, तदभूतभावः, तत्क्रियाख्यानम् एवं स्वार्थश्च एते अर्थाः निश्चिताः सन्ति। अस्मिन् अर्थे क्यच, क्यङ्, काम्यच्, णिङ् एवं णिच् आदिप्रत्ययाः भवन्ति। तत्सम्बन्धि नियमाः विवेचिताः सन्ति। परिच्छेदेऽस्मिन्कण्ड्वादिगणपठितधातूनां संकलनं विद्यते।

प्रक्रियापरिच्छेदः– परिच्छेदेऽस्मिन् प्रमुखतया सन्नन्तानां णिजन्तानां च प्रयोगस्य प्रक्रिया व्याख्यायिता अस्ति।

कृदन्तपरिच्छेदः–अत्र कृदन्तस्य अन्तर्भूताः केवलं कृत्यप्रत्ययाःएव विवेचिताः सन्ति।कृत्यप्रत्ययेनसाकं सेट्, अनिट्, वेट् धातूनां परिगणनं कृतम् ।

अव्ययप्रकरणम्–ःअत्र अव्ययस्य विभागः अनेन प्रकारेण ग्रन्थकृता कृतः– प्रतिज्ञावीतः, निपातः व्युत्पन्नश्च त्रिधा विभक्तःअस्ति।

अस्यां संगोष्ठ्यांसत्रद्वयम् आसीत्। प्रथमसत्रस्य श्रीलालबहादुरशास्त्रि–राष्ट्रियसंस्कृत– विश्वविद्यालयस्य वेदवेदाङ्गसंकायस्य संकायाध्यक्षाः प्रो. जयकान्तसिंहशर्ममहोदयाः अध्यक्षाः आसन्।तेषाम् आध्यक्ष्येमुख्यवक्तारः दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य, आचार्याः प्रो. सत्यपाल सिंहमहाभागाः, द्वितीयवक्तारः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य व्याकरणविभागस्य सहाचार्याःडॉ. दयाल सिंह पंवारमहाभागाः आसन् ।श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य व्याकरणविभागस्य विभागाध्यक्षाः प्रो. रामसलाहीद्विवेदिवर्याःविषयप्रवर्तनम् अकुर्वन्। अस्मिन् सत्रे मुख्यातिथयः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्ययशस्विनः कुलपतिमहोदयाः प्रो. मुरलीमनोहर पाठकवर्याः उपस्थिताः आसन्। जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृत–प्राच्यविद्याध्ययनसंस्थानस्य, आचार्याः प्रो. सन्तोषकुमारशुक्लमहोदया सान्निध्यम् अलङ्कृतवन्तः।

दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य विभागाध्यक्षाः प्रो. ओमनाथविमलिमहोदयाः द्वितीयस्य सत्रस्य अध्यक्षताम् अकुर्वन्।अस्मिन् सत्रेजयपुरनगरस्य जगद्गुरुरामानन्दाचार्य– राजस्थानसंस्कृतविश्व–विद्यालयस्य व्याकरणविभागस्य आचार्याः प्रो. राजधरमिश्रमहाभागाःमुख्यवक्तारः आसन्। वक्तृरूपेणवाराणसीनगरस्य काशीहिन्दूविश्वविद्यालयस्य संस्कृतविभागस्य सहाचार्याः डॉ. अभिमन्युवर्याः,धर्मशालास्थस्य हिमाचलप्रदेशकेन्द्रीय–विश्वविद्यालयस्य संस्कृत–पालि–प्राकृत–विभागस्य सहायकाचार्याः,डॉ. कुलदीपकुमारवर्याः, दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य सहायकाचार्याः डॉ. सोमवीरमहोदयाः व्याख्यानं प्रस्तुतवन्तः।

उद्घाटनवक्तव्येप्रो. मुरलोमनोहरपाठकमहोदयाः अवोचन् यत् पं. मधुसूदनओझामहोदयानांवाङ्मयमाध्यमेन वेदविज्ञानस्य प्रचाराय प्रसाराय निरन्तरसंलग्नस्य श्रीशंकरशिक्षायतनस्यमहत्त्वपूर्णम् अवदानं विद्यते।व्याकरणविनोदग्रन्थः अधीतव्याकरणछात्राय वैशिष्ट्यं विधत्ते। इयः समायोज्यमानासंगोष्ठी सर्वथा सफलता भवेत् इति महनीया शुभकामना कुलपतिवर्यैः प्रदत्ता।विषय–प्रवर्तनक्रमेप्रो. रामसलाहीद्विवेदिनः व्याकरणशास्त्रस्य परम्परा एवं व्याकरणशास्त्रस्य वैशिष्ट्यं प्रतिपादितवन्तः। व्याकरणपरम्परायां व्याकरणविनोदः ग्रन्थः अद्भुतः विदुषे पठनीयः अस्ति। प्रो. सत्यपालसिंहमहाभागाःस्वकीये वक्तव्येनामधातुपरिच्छेदस्य विवेचिताः प्रक्रियायाः विमर्शं कृतवन्तः। तैः भणितं यत् अस्मिन् नामधातुप्रकरणे बहूनि उदाहरणानि समुद्घाटितानि सन्ति। डॉ. दयाल सिंहपंवारमहोदयाः प्रक्रियापरिच्छेदम् अवलम्ब्य व्याख्यानं प्रदत्तवन्तः।अस्मिन् परिच्छेदे सन्नन्तप्रत्यानां एवं णिजन्तप्रत्ययानां स्वरूपं वैशिष्ट्यंप्रचुरोदाहरणं च रेखांकितम् अस्ति। प्रो. सन्तोषकुमारशुक्लमहोदयाः स्वकीयोद्बोधनेश्रीशंकरशिक्षायतनस्य– शैक्षणिकगतिविधेः उल्लेखंकृतवन्तः। तैः भाषितं यत् पं. ओझामहोदयस्य व्याकरणविनोदः ग्रन्थःव्याकरणशास्त्रस्य शोधार्थिने एवं अध्येत्रे अत्यन्तम् उपादेयः अस्ति।अध्यक्षीये उद्बोधने प्रो. जयकान्तसिंहशर्मवर्याःअवोचन् यत्व्याकरणशास्त्रस्य परम्परायां अनेके सम्प्रदायाःविद्यन्ते। येषांव्याकरणशास्त्रस्य विकासेमहद्योगदानम् अस्ति।सम्प्रति पाणिनिव्याकरणस्य प्रचलनंअधिकम् अस्ति। परन्तु वयं पाणिनेःभिन्नव्याकरणशास्त्रस्यअन्यसम्प्रदायस्य उपेक्षां न करवाम। पं. ओझामहोदयैः व्याकरणविनोदस्य कतिपये स्थले एतादृशानि उदाहरणानि प्रदत्तानियस्य संगतिः पाणिनिव्याकरणात्न संभवति।

प्रो. राजधरमिश्रमहाभागाःतद्धितपरिच्छेदम् उररीकृत्य व्याख्यानम् अकुर्वन्। पं. ओझामहोदयः वैदिकस्य एवं लौकिकस्यउभयविधशब्दस्य व्याख्याख्यां व्यकरणविनोदे कृतवान् अस्ति। अस्मिन् ग्रन्थे ये नियमाः सन्तिते सामान्यतया लौकिकस्य एवं वैदिकस्यउभयविधशब्दस्य अर्थनिधरिणं करोति।डॉ. अभिमन्युमहोदयाःकृदन्तपरिच्छेदे व्याख्यानम् अकुर्वन्। तैः कथितं यत् पं. ओझामहोदयैःप्रदत्तानि अनेकानि उदाहरणानि ग्रन्थेऽस्मिन् विलसन्तितराम्। अस्मिन् परिच्छेदे ग्रन्थकाराः ९१७ उदाहरणानिप्रदर्शतानि सन्ति।येषु उदाहरणेषु यत्प्रत्ययस्य१२३, ण्यत्प्रत्यय १११, क्यप्प्रत्ययस्य६९, केलिम प्रत्ययस्य ८२, अनीय प्रत्ययस्त्य ९७, तव्य–तव्यत् प्रत्ययस्य ४३५ उदाहरणानि सन्ति। एतादृशानि उदाहरणानि कृदन्तप्रत्ययस्य व्याकरणस्यप्रक्रियाग्रन्थ नैवोपलभ्यन्ते। अस्य ग्रन्थस्यइदं वैशिष्ठ्यंप्रतिभाति।डॉ. कुलदीपकुमारवर्याःस्वकीये व्याख्यानेअव्ययपरिच्छेदे अव्ययविभागस्य वर्णनं कृतवन्तः। तेषु विभागेषु प्रतिज्ञावीतः, व्युत्पन्नः, निपातःएते त्रिधा सन्ति। डॉ. सोमवीरमहाभागाःसमासपरिच्छेदस्यअव्ययीभावसमासस्य विशदां व्याख्यां कृतन्तः।अस्मिन् अव्ययीभावसमासे ग्रन्थकारः ओझामहोदयः अव्ययीभावसमासस्य परिभाषाम् अलिखत् यत् अनव्ययस्य अव्ययत्व–संपत्तिः अव्ययीभावः। यथा उपकृष्णम् इत्यत्र उप इत्यस्य अव्ययं नास्ति, न वा कृष्णस्य अव्ययत्वम् अस्ति। अत एव अव्ययीभावः।अध्यक्षीयेउद्बोधनेप्रो. ओमनाथविमलिवर्याः व्याकरणदर्शनस्य एवं नामधातुपदार्थस्यविवेचनं कृतवन्तः। तैः भणितं यत् ओझामहोदयस्य व्याकरणविनोदग्रन्थः व्याकरणशास्त्रस्यउत्तमा कृतिः अस्ति। शोधार्थिनःअस्य ग्रन्थस्य अध्ययनायप्रेरिताः भविष्यन्ति।तैः कथितं यत् शीघ्रमेव अस्य ग्रन्थस्य हिन्दीभाषायाम् अनुवादःव्याख्या अपि भवेदिति। अनया व्याख्यया ग्रन्थे निहितं व्याकरणशास्त्रविषयकं नूतनज्ञानं प्रस्फुटीभविष्यति । संगोष्ठ्याः शुभारम्भः अतिथीनां सरस्वतीपूजनेन दीपप्रज्वालनेन सञ्जातः। श्रीलालबहादुर शास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य न्यायविभागस्य आचार्याः प्रो. महानन्दझामहोदयाःसस्वरं मङ्गलाचरणंकृतवन्तः। प्रथमसत्रस्य सञ्चालनं श्रीशंकरशिक्षायतनवैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. मणिशंकरद्विवेदी द्वितीयसत्रस्य सञ्चालनंडॉ. लक्ष्मीकान्तविमलःअकरोत। अस्यां संगोष्ठ्यांदिल्लीविश्वविद्यालयस्य, जवाहरलालनेहरूविश्वविद्यालयस्य, श्रीलालबहादुरशास्त्रिराष्ट्रिय–संस्कृतविश्वविद्यालयस्यतथा अन्यशैक्षणिकसंस्थानस्यअध्येतारःशोधार्थिनश्चसोत्साहंभागं गृहीत्वा संगोष्ठ्याः सफलीचक्रुः।

# संस्कृत-संसद्-"निष्ठा" द्वारा अन्तर्महाविद्यालयीय-प्रतिस्पर्धा 2024समायोजिता

दिल्लीविश्वविद्यालयस्याङ्गीभूतराजधानीमहाविद्यालयस्य संस्कृतविभागेन प्रतिष्ठापितः "संस्कृत-संसद्-निष्ठा" द्वारा २२-०३-२०२४ तमं दिनांकम् अन्तर्महाविद्यालयीय-प्रतिस्पर्धा २०२४ समायोजिता।





समायोजितायामस्यां प्रतिस्पर्धायां संस्कृतश्लोकगायन-श्लोकचित्रांकन-प्रश्नमञ्चादि प्रतियोगितानां समायोजनं संजातः। एतासु प्रतियोगितासु दिल्लीप्रदेशस्थविविधशैक्षणिक- संस्थानेभ्यः महाविद्यालयेभ्यश्च स्नातकपरास्नातकस्य पञ्चाशतधिकाः विद्यार्थिनः प्रतिभागङ्कृतवन्तः।कार्यक्रमस्य समुद्घाटनं दीपप्रज्वलितेण मङ्गलाचरणत्वेण जातः।

कार्यक्रमेऽस्मिन् संरक्षकत्वेनाध्यक्षत्वेञ्च समुपस्थिताः महाविद्यालयस्य यशस्विनः प्राचार्याः स्वनामधन्याः प्रो. राजेश गिरि महाभागाः मुख्यातिथिडॉऋषिराजपाठकं पुष्पगुच्छं दत्वा स्वागतं कुर्वन् स्वानन्दवचोभिः शिक्षकाणाञ्छात्राणाञ्च मार्गनिर्देशनमुत्साहवर्धनञ्च कृतवन्तः। स्वस्मिन् व्याख्याने संस्कृतभाषायाः महत्वेन सह वर्णमालाज्ञानं प्रति अन्तस्तलतृप्तिसूचकान् शब्दान् स्थापितम्।

# संस्कृतभारतीदेहरादूनेन दशदिवसीयं सरलसंस्कृतसंभाषणशिविरं समायोजितम्

देहरादूनम्। देहरादूनमहानगरे घोसी गली , पंचायतीमंदिरे समायोजितस्य शिविरस्यास्य अतिथिरूपेण समागतः श्रीमान् पीएसदासः कथितवान् यत् संस्कृतभाषया अस्माकं कृते गौरवास्पदम् । विशिष्टातिथिरूपेण उत्तराखंडविद्वत्सभायाः अध्यक्षः आचार्यविजेंद्रममगाईवर्यः उक्तवान् यत् संस्कृतभाषा अस्माकम् आध्यात्मिकतायाः संपोषिका, शास्त्राणां



संरक्षिका, सामाजिकसौहार्दस्य च मार्गदर्शिका वर्तते अतः अवश्यं पठनीया। विभागसंयोजकः श्रीनागेद्रव्यासः उक्तवान् यत् अस्माभिर्निरन्तरं दशदिनानि यावत् प्रतिदिनं शिविरम् आगत्य पठनीयम। पुनः पठित्वा समाजे अन्येऽपि प्रेरणीयाः । सत्रस्य शुभारंभः अतिथिभिः दीपप्रज्ज्वालनेन विहितः । जनपदमंत्री डॉ प्रदीपसेमवालः संस्कृतेन परिचयं, सः सा तत् , अत्र तत्र इत्यादीनां पाठ्यबिंदूनाम् अभ्यासं कारितवान्। जनपदस्य शिक्षणप्रमुखः राजेशशर्मा

# एकदिवसीया राष्ट्रियसंगोष्ठी आयोजिता

-डॉ. जोगिंदरकुमार

तोशाम। हरियाणाराज्यस्य भिवानीमण्डलस्य तोशामनगरे स्थिते बनवारीलाल जिन्दल सूईवाला महाविद्यालये संस्कृतविभागेन "मानसिक- शारीरिक-स्वास्थ्याय संस्कृतसाहित्ये अष्टाङ्गयोगः" इति विषये एकदिवसीया राष्ट्रीयसंगोष्ठी समायोजिता। संगोष्ठीयं हरियाणा उच्चतर शिक्षाविभागद्वाराऽनुमोदिताऽऽसीत्। संगोष्ठ्याः अध्यक्षता




प्रबन्धनसमितेः स्थानीयासंरक्षकेण सम्मान्येन एडवोकेटदेवेन्द्रदेवशर्मामहोदयेन कृता। दयालसिंहमहाविद्यालयस्य पूर्व प्राचार्याः डॉ. आर.के. गौडः मुख्यातिथिरूपेण समुपस्थिता आसन्। महाविद्यालयस्य प्राचार्येण डॉ. राकेशकुमारमहाभागेन सर्वागन्तुकानां स्वागतं कृतम। अस्यां संगोष्ठ्यां संस्कृतजगतो मूर्धन्या विद्वान्सः सेवानिवृत्ताः प्रो. डॉ. बलवीर आचार्यवर्या महर्षि- दयानन्दविश्वविद्यालय-रोहतकतो बीजवक्तृरूपेण समुपस्थिता आसन। ते योगस्य को`र्थः? किं महत्त्वमस्ति? को लाभश्चेति नैकान् सन्दर्भान् सविशदं प्रेरणादायकं ज्ञानवर्धकञ्च व्याख्यानं प्रस्तुतवन्तः। सांख्ययोगस्य, कर्मयोगस्य, भक्तियोगस्य, राजयोगस्य हठयोगस्य चाति सारल्यभावैः व्याख्या कृता। एवमेव चास्मात् विश्वविद्यालयात् समागताः विद्वद्वर्याः प्रो. डॉ. सुरेन्द्रकुमारमहोदयाः तकनीकीसत्रस्य विशिष्टवक्तृरूपेण समुपस्थिता आसन। तैः स्वास्थ्यं किमस्ति? स्वास्थ्याय योगस्य का चोपयोगितेति सविस्तारेण प्रतिपादिते । दयालसिंहमहाविद्यालयतः समागतेन डॉ. के. वी. शर्मामहोदयेनापि सुन्दरं व्याख्यानं प्रस्तुतम। समापनसत्रे डॉ. मदनमानवेन सैद्धांतिकं व्यावहारिकं च योगमुदित्वा विविधेभ्यो महाविद्यालयेभ्यो विश्विद्यालयेभ्यश्च समागताः सर्वे विद्वांसो विदुष्यः शोधार्थिनश्च लाभान्विताः कृताः। संगोष्ठ्याः संयोजनसचिवेन डॉ. जोगेन्द्रकुमारेण संगोष्ठ्यां समागतेभ्यः सर्वेभ्यो विद्वद्भ्यः धन्यवादाः कृताः। नैके आचार्याः, शिक्षकाः शिक्षिकाः शोधार्थिनो विद्यार्थिनश्च तत्र समुपस्थिता आसन। तत्रैव डॉ. जोगेन्द्रकुमारेण प्रणीतस्य "श्रीश्यामस्तुतिशतकम" इतिनामधेयस्य पुस्तकस्य विमोचनमपि कृतम्।

# उत्तरप्रदेशस्य मथुराजनपदे भगवतः श्रीकृष्णस्य क्रीडास्थले श्रीधामवृन्दावने दिनत्रयस्य संस्कृतस्य व्याख्यानमालाकार्यक्रमः सम्पन्नः

उत्तरप्रदेशसंस्कृतसंस्थानम् (भाषाविभागः उत्तरप्रदेशशासनाधीनः), श्रीभरतप्रेमसेवा आश्रम चेरिटेबल ट्रस्ट एवं श्रीश्रीपरमानन्दभारती चौरिटेबल ट्रस्ट इत्येतेषां संयुक्ततत्त्वावधाने आयोजिता त्रिदिवसीया अन्ताराष्ट्रया



व्याख्यानमाला संपन्ना जाता अस्ति। मार्चमासस्य द्वाविंशे दिनाङ्के आरब्धे अस्मिन् व्याख्यानमालाकार्यक्रमे वृन्दावनस्य विद्वांसः उपस्थिताः आसन्। गोलोकधाम्नः संस्थापकानां धर्मरत्नपदभूषितानां श्रीगोपालशरणदेवाचार्याणाम् आध्यक्ष्यत्वे आयोजिते उद्घाटनसत्रे सेवामङ्गलम् इत्यस्य संस्थापकाः श्रीगोविन्दानन्दतीर्थस्वामिनः, भागवतभास्कराः श्रीकृष्णचन्द्रठाकुरमहाभागाः श्रीमद्भागवतमन्दिरस्य संस्थापकाः श्रीबद्रीशगुरवः च आधुनिकयुगे शास्त्ररक्षायै आचरणशिक्षायै च संस्कृतगुरुकुलानाम् आवश्यकताम् उद्बोधितवन्तः। कार्यक्रमे आचार्याः श्रीमन्तः बद्रीशगुरवः उक्तवन्तः यत् अस्मिन् समये समग्रे अपि विश्वे सामाजिक अव्यवस्थाः, धर्मे अरुचिः, यूनां आचरणहीनता इत्येतेषाम् अराजकतत्त्वानां वृद्धिः गुरुकुलशिक्षायाः अभावः एव इति उक्तवन्तः । द्वितीये दिवसे त्रयोविंशे दिनाङ्के श्रीनिवासविद्यापीठस्य अध्यक्षः श्रीजीवनशर्मामहोदयः, आनलाईनमाध्यमेन नेपालवास्तव्यः श्रीधर्मराजकुईकेलमहोदयः, श्रीसतीशशर्मामहोदयः, श्रीशिवप्रसादमहाभागः, अमेरिकायां स्थित्वा आनलाईनमाध्यमेन श्रीगोविन्दगुरुकुलं चालयन्ती भगिनी लक्ष्मीशर्मामहाभागा, श्रीसुधिष्ठमहाभागः, श्रीधनञ्जयमहाभागः अन्ये च बहवः विद्वांसः उपस्थाय प्राचीनकालात् अधुनापर्यन्तं गुरुकुलस्य विषयवस्तु वर्णितवन्तः । अस्य कार्यक्रमस्य समापनसत्रे संस्कृतजगति परं विद्वानसः श्रीमन्तः सर्ज्ञज्ञभूषणवर्याः उपस्थिताः आसन्।

---

गीताभ्यासं कृतवान् । मञ्चसञ्चालनं धीरजमैठाणी अकरोत्। अवसरेऽस्मिन् आचार्यःयोगेशकुकरेती, महानगरमन्त्री माधवपौडेलः महानगरमहिलाप्रमुखा डा . अनुमेहा वैद्या , महानगरछात्रप्रमुखा शिवानीरमोला, डोईवालाखण्डसंयोजक डा. आनन्दमोहनजोशी :, रायपुरखण्ड संयोजकः श्रीधीरजबिष्टः, उत्तराखंडविद्वत्सभायाः उपाध्यक्षः सत्यप्रसादसेमवालः इत्येतैः सहिताः संस्कृताध्येतारः शिक्षार्थिनः समुपस्थिताः आसन् ।

# राजरामोभिरामः



प्रो. ताराशंकरशर्मा पाण्डेय:

**राजरामो रसेशो**

स्मितदशनसुदर्शी ब्रह्मरूपावतारो
दशरथतनयोऽस्ति क्षात्त्रधर्मावलम्बी ।
अभिनववसनोऽसौ चन्दनालेपचारू
रुचिरवदनमूर्ती राजरामो रसेश:॥1॥

**कत्तोपमा केकयी**

यायोध्या धरणी रसासुररमा-रामाभिरामावरा
तत्रास्ते मधुमन्थरातिमथिता कत्तोपमाकेकयी।
नोयोध्याजनरक्षकेण रघुणा पुत्रेण सा स्वासुना
तात: पावरपातितो दशरथो वाक्येन संरक्षित:॥2॥

**श्रीरामसूर्योदये**

कासारे मलिनेपि प्रावृषि मते पक्षे विपक्षे स्थिते
राष्ट्रं राडिव जायते सरसिजं श्रीरामसूर्योदये।
संजाता जनताद्य फुल्लहृदया नष्टान्धकारे त्वयि
लोकं लोकममोघदर्शनमहं हे राम! मोदे सदा॥3॥

**नीलीरागं मनोज्ञम्**

कान्ताकालालकेषु ग्रथनसुनिपुण: पुष्पमालाप्रवेणीं
फुल्लां संयोज्य हृष्टां स जनकतनयां राघवो रामचन्द्र:।
नीलीरागं मनोज्ञं कमपि कथयते साहचर्य्यप्रकाशं
श्रीताराबीजमन्त्र: समवतु सकलं रामसीमप्रबद्ध:॥4॥

**रामाननोद्भावन:**

रामे नस्त्वयि प्राणवासवरणं लोकत्रयस्योतनं
श्रेष्ठस्तिष्ठति रामनामरसिक: पादाब्जकोषे रत:।
योऽन्य: सीदति रागरंगरसिको रामाननोद्भावन
इत्युल्लासभरौ नरौ स्वरुचिनाऽभीष्टं वरं प्राप्नुत:॥5॥

**बीजमन्त्र: प्रसिद्ध:**

सीतारामस्य मध्ये विलसति परमो बीजमन्त्र: प्रसिद्ध:
शान्त्यानन्द: प्रदीप्त: सरलसुहृदयक्षेमकारी विशेष:।
तारानाम्ना सुबोध: प्रतिदिनजपने मोक्षरूपेण सिद्ध:
श्रीशोभ: सैष पाता रमणसुखकर: शंकरशंकरस्स्यात्॥6॥

**हे राम हे राम हे !!!!**

पारीवारिकजातसौरभकृते संत्यक्तमोह: सखे!
जीवात्मभ्रमरोस्मि रामकमले गुञ्जायमानारव:।
संप्राप्तामृतरामनाममुखरो हे राम हे राम हे !!!
जीवन्मुक्तवदे भवामि भुवने रामानुसारोद्वह:॥ 7॥

भूतपूर्वपुरुष:

सतामध्यजनेषु य: पदमदोन्मत्तोद्भवत्पौरुषो
जात: सम्प्रति भूतपूर्वपुरुष: पुंलिङ्गतां स त्यजन्।
तस्माद्रामपदद्वयीं शरणगो नित्यं भजेत प्रभो:
सीतारामपदादपूर्वचरितो जायेत मोक्षास्पदम्॥8॥

**ममान्तर्विराम:**

मनसि मनसि नित्यं वर्त्तमानो जनानां
कणकणरममाणो राजरामोभिराम: ।
समव समव मा मा सन्त्यजालम्बहीनं
जय जय रघुनाथस्त्वं ममान्तर्विराम:॥9॥

## प्रतस्थे काननं राम: (गीतम्)



-डॉ सिंहासन पाण्डेय:
देवरियात:

पितु: वाक्ये मुदा तिष्ठन्, प्रतस्थे काननं राम:।
दधानं तं तपोवेषं, वयं दृष्ट्वा विषीदाम:-2
पितु: वाक्ये................।
निषादो मानितस्तेन, जटायु: लालित: पक्षी।
वनेचरबन्धुवृन्दस्य , कृत: पन्था: शुभायाम: -1
पितु: वाक्ये................।
शबर्या भक्तिमत्या ते, श्रमणया प्रस्तुतं स्तुत्या।
सुमधुरं स्वादितं बदरी,फलं भुक्तं तु ध्यायाम: ।।2
पितु: वाक्ये................।
कपीशै: मेलनं कृत्वा , निबद्ध: सागरे सेतु:।
समञ्जसादिता भव्या, हतो रक्ष:पति: काम:।।3
पितु: वाक्ये................।
महीभारं समुद्धर्तुं, प्रभोरवतारकं जातम्।
ललितनरलीलयास्माकं , सदालोके मनोरामः ।।4
पितु: वाक्ये मुदा तिष्ठन्, प्रतस्थे काननं राम:।
दधानं तं तपोवेषं, वयं दृष्ट्वा विषीदाम:-2

# व्यासपञ्चकम्



डॉ श्रेयांश द्विवेदी
संस्थापक कुलपति

कथानन्ददं कर्मशीलं कृपालुम्।
खगं खे गतं खड्गवन्तं खगेशम्।
गणेशाधिपं गोप्रियं गानशीलम्।
घनश्यामरूपं घनाभं घकारम्।
ङकारं मुदा पञ्चमं विन्दुरूपम्।
सदैवाक्षरं व्यासरूपं नमाम:॥1
चकारश्चितौ चर्चितौ चन्द्रभानू ।
छकारेण छद्येन छन्दश्च छत्रम्।
जहाति ज्वलन्तं जपन्तं न जीवम् ।
झझं झं झमाझं झकारेण झं झम् ।
ञकारं परं पावनं विन्दुरूपम्।
सदैवाक्षरं व्यासरूपं नमाम:॥2
टकारेण टं टं टकारं निनादम्।
ठठं ठं प्रकुर्यात् ठकारेण ठं ठम् ।
डडं डीड्गतौ डीयते डीयमानम्।
ढढं ढाति ढक्कां निनादे ढकारम्।
णकारं हि मूर्धास्थितं विन्दुरूपम्।
सदैवाक्षरं व्यासरूपं नमाम:॥3
तमानन्ददं तत्त्वरूपं तुरीयम्।
थथंथं थथैथा थिथैथा थुनादम्।
दधाति द्युलोकं दिवेशं दिनेशम् ।
ध्रुवं ध्यानगम्यं धृतिं धर्मशीलम्।
नमस्कारयोग्यं नकारं नवीनम्।
सदैवाक्षरं व्यासरूपं नमाम:॥4
परेशं प्रकृष्टं प्रशान्तं प्रकाशम्।
फफंफं फफूत्काररूपं फणीन्द्रम्।
बबं ब्रह्मरूपं विशिष्टं स्वरूपम्।
भवं भास्करं भावयन्तं भवेशम्।
मनो मानसं मुक्तिदं मानरूपम्।
सदैवाक्षरं व्यासरूपं नमाम:॥5
कवर्गाच्च पवर्गान्तं सर्वसौख्यप्रदायकम्।
व्यासपञ्चकमेतद्वै, श्रेयांशेन विनिर्मितम्॥

## त्वां श्रीविद्यादेवि याम्यहम्



प्रख्या राधाकृष्णशर्मा
San Ramon,
California, USA

क्षुधादेवि नमस्तुभ्यं भावये त्वदुपस्थितिम्।
उदरव्यथयाऽजस्रं जिह्वाचापल्यहेतुना॥१॥
नमो देवि पिपासे ते भृशप्रभावशालिनि।
क्षुधादेवीसुहृत्त्वात्ते नोपेक्षे त्वां कदाचन॥२॥
तन्द्रादेवि नमस्तुभ्यं मच्छरीरेऽभिगूहसे।
उदरे पोषिते जाते प्रादुर्भवसि तत्क्षणम्॥३॥
निद्रादेवि नमस्तुभ्यं मदीयलोचनच्छदौ।
काले कर्षसि चाकाले मञ्चे जवनिके इव॥४॥
मायादेवि नमस्तुभ्यं गर्वाहङ्कारकारिणि।
मत्कवितास्वपि प्राय: श्रेष्ठतास्तीति कर्हिचित्॥५॥
क्षमादेवि नमस्तुभ्यं स्थिरीभवेर्न सर्वदा।
मामकीनाल्पकाव्यानां पाठकानां मनस्तले॥६॥
जरादेवि नमस्तुभ्यं समयेनाशु गच्छता।
प्रदर्शयेस् त्वदैश्वर्यं प्रभूय शक्तिवर्धिता॥७॥
नमस्ते विस्मृते देवि जराप्रेरितभावने।
विज्ञानाज्ञानवृत्तान्तनिष्कासनप्रवर्तिनि॥८॥
नमस्ते मूर्खते देवि तीव्राभिव्यापनात्तव।
किंकर्तव्यविमूढोऽहं बुद्धिनाशमवाप्तवान्॥९॥
तापत्रयविनाशार्थं महात्रिपुरसुन्दरि।
ललिते जगदम्ब त्वां श्रीविद्यादेवि याम्यहम्॥१०॥
सुगन्धिकुन्तलाम्बाया: प्रपौत्र: परिपीडित:।
क्षुद्रदेवीवशीभूतो भवसागरमज्जनात्॥११॥

## पठनीयं संस्कृतम् गीतम्



-ईशान तिवारी
काशी हिन्दू विश्वविद्यालय

पठ निजसंस्कृतभाषां , निज सदनेऽहर्निशं
लिख नव गेयं काव्यं , वर्धस्व संस्कृतम् ॥
यस्मिन् न गेहे गुञ्जति गीति:
बाला: पठन्ति न सुन्दरनीतिम् ।
तस्मिन् गेहे नैव , नृत्यन्ति देवता:
एतदर्थं बाल! पठनीयं संस्कृतम् ॥
यावद्धारायां संस्कृतप्रसारं
कुर्वन्त्यहो न नु नेतार:
विश्वगुरुर्नहिंति तावन्निजराष्ट्रं
एतदर्थं बाल! पठनीयं संस्कृतम् ॥
गुरवो यदा न बालाय शिक्षां
ददति गृहे न मनसा हृदेव
संस्कृतमयनिजदेशं , तदा द्रक्ष्यामि कथं
एतदर्थं बाल! पठनीयं संस्कृतम् ॥
साहित्य- वेदं ज्योतिष- योगं
शास्त्रं समस्तं व्याकरणं च
सर्वं ज्ञातुं प्रथमं , वदनीयं संस्कृतं
एतदर्थं बाल! पठनीयं संस्कृतम् ॥
पठ निजसंस्कृतभाषां , निज सदनेऽहर्निशं
लिख नव गेयं काव्यं , वर्धस्व संस्कृतम् ॥

# अनुवादोपि कलोस्ति विज्ञानञ्च क्वचिन्मतम्

प्रो. बनमाली बिश्वाल:



प्रो. बनमाली बिश्वाल:

संसारो देवशिल्पं चेत् काव्यान्यपि कला: समा:।
सर्वं मानवशिल्पं तु तस्यानुकृतिरेव च॥
यदोनुवचनं स्यात्तु विहितस्य क्वचित् पुन:।
तदनुवादतन्त्रं वै गौतमप्रतिपादितम्॥
अनु पश्चात्तु प्राप्तस्य कथनं सप्रयोजनम्।
अनुवादस्स एवास्ति टीकाकारैस्तु मन्यते॥
ज्ञातस्य कथनं शास्त्रेनुवाद: परिभाषित:।
जैमिनीन्यायमालायां मतमेतत् पुरस्कृतम्॥
निरूपणप्रकारश्च वाच्यार्थस्य क्वचिन्मतम्।
गुप्तश्चाभिनवो ब्रूते भारत्यां तर्कसम्मतम्॥
छाया च प्रतिरूपं च प्रतिबिम्बं क्वचित् पुन:। अनुकृतिस्तथाभास:
सन्त्यनुवादवाचिन:॥
शब्दश्शचानुवादश्चेदनुवादोभिधीयते।
स च शब्दानुवादोस्ति सर्वथोङ्गीकृतो वुधै:॥
भावानामनुवादे तु भावानुवादसंज्ञक:।
प्रतिशब्दानुवादस्तु तत्र नापेक्ष्यते क्वचित्॥
ईषत्स्पर्शेण भावानामवलम्बनमुच्यते।
अवलम्बनकाव्यञ्च यथा दारुब्रह्मास्ति मे॥
क्वचित्सारानुवादोस्ति व्याख्यारूप: क्वचित्पुन:।
अनुवादस्य चास्त्येव क्वचिदनुकृति: पुन:॥
वस्तुग्रहणमात्रेण चानुसर्जनमुच्यते।
प्रतिभा कारयित्री च तत्र चापेक्ष्यते सदा॥
अनुवादोपि कलास्ति विज्ञानञ्च क्वचिन्मतम्।
कलाविज्ञानयोस्तत्र चापेक्ष्यते तु मिश्रणम्॥
अभ्यासोपेक्ष्यते नित्यं नैपुण्याय न संशय:।
काम्यतेध्ययनञ्चात्र त्वनुसन्धानपूर्वकम्॥

# भविष्यं भारतस्यापि संस्कृतेन सुरक्षितम्

देहल्यां च यशोभूमौ केन्द्रे सम्मेलनस्य वै।
राजते च सभागारो ब्रह्मकमलसंज्ञक:॥
दीक्षान्ताख्यसमारोहे विश्वविद्यालयस्य न:।
मन्त्रिभिस्तत्र सम्प्राप्ता: राष्ट्रपतिमहोदया:॥
विश्वविद्यालयच्छात्राश्चाभवन्नत्र दीक्षिता:।
लब्ध्वा प्रमाणपत्राणि सुवर्णपदकानि वै॥
तत्रादौ पंचवाद्यैश्च शोभायात्रा प्रवर्तिता।
ततश्च राष्ट्रगानेन दीक्षांत: सम्प्रवर्तित:॥
रक्षणात् संस्कृतस्यैव संस्कृतिश्च सुरक्षिता।
भविष्यं भारतस्यापि संस्कृतेन सुरक्षितम्॥

# होलिका



डॉ विपिनकुमारद्विवेदी
फतेहपुरम्, उत्तरप्रदेश:

होलिका आयाता होलिका आयाता,
विविधवर्णै: सह होलिका आयाता।
होलागीति: दिशि दिशि भवति,
गृहे चत्वरे वर्ण: वर्षति॥

फाल्गुनमास: अयं च अस्ति,
दिवस: सुभग: सुभग: भवति।
क्षेत्रे शस्यं पक्वं भाति,
कृषक: व्यस्त: तत्र याति॥

वृद्धा: बाला: समे युवान:,
होलावर्णरंजिता: सन्ति।
मिलति मिष्टान्नं गृहे गृहे च,
गन्ध: पवने तस्य प्रसरति॥

मधुर: मधुर: वाद्यध्वनि:,
गुंजति सततं ग्रामे नगरे।
गगनं निखिलं वर्णै: युक्तम्,
भवति कलरवं भवने भवने॥

रात्रौ होलादहनं भवति,
काष्ठं नीत्वा सर्वे यान्ति।
परिक्रमा च क्वचित् स्नानम्,
तण्डुलक्षेपणं तत्र भवति॥

प्रेम्णा तिलकं कृत्वा भाले,
परस्परं च जना: मिलन्ति।
अन्त: वैरं दूरे कृत्वा,
स्नेहेन च गले लगन्ति॥

# कर्मभूमिरिति नाट्यसङ्ग्रहस्य समीक्षमणम्

निखिब्रह्माण्डसम्मोहिनी अमरभारती अनादिकालादेव लोकत्रयं पावयन्ती समस्तसन्तापमपनयन्ती सर्वदा मधुरादिरसप्रवाहं कुर्वती विलोक्यते। स्यान्नाम सुकृतां दुष्कृतां वा कालः, सज्जनैः संस्तुता दुर्जनैः पीडिता न कदापि विररामेतीयं विजानीमो वयं सुरभारतीमार्गपथिकाः। वैदिककालादारभ्य अभिराजयुगपर्यन्तमेषा पुराणी युवतीव सुजनान् सम्मोहयन्ती विलोक्यते। संस्कृतं सर्वजनोपकारि मन्यते। अस्य कारणमस्ति अस्यां रचितानां विविधानां शास्त्राणामपारो निधिः। शास्त्रचक्षुषा नीयमान एव जनो लक्ष्यं विन्दति। शास्त्रमार्गमुल्लंघ्य गच्छंस्तु गर्त एव निपतति। अतएव तूक्तं भगवता

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।।**

अत्र चिन्तनीयमस्ति यदेकमेव तत्त्वं विभिन्नपथैः उपदिश्यते। यथा सत्यं वदेति उपनिषद्वाक्यं केवलमुपदिशति यत्सत्यमेव वक्तव्यम्। किन्तु तदेव यदि नृपहरिश्चन्द्रस्य नाटकेन जनेभ्यो दर्श्यते तदा सत्वरमेव प्रभावप्रक्षेपो जायते। अतः शास्त्रेषु नाटकं श्रेष्ठमिति मन्यामहे। उक्तमपि लभ्यते काव्येषु नाटकं रम्यमिति।

अनेन प्रतीयते यत् लोकशिक्षणाय सरलो मार्गो नाटकमेवास्ति। नान्यः पन्था विद्यते अयनायेति धिया। इदमेव मनसि निधाय अस्मत्प्रियवरेण डॉ. पंकजझाख्यः कविः कर्मभूमिनाम्ना स्वरचितानां षोडशरूपकाणां संग्रहमेकं प्रकाशयतीति श्रुत्वा मोमुदीति नश्चेतः। तत्र प्रथमं नाटकम् अभिमानो न कर्तव्यः इति वर्तते। अस्मिन् भागवतशास्त्री राजापुष्करसेनं भाषमाणो यद् वदति तदस्ति दार्शनिकभावसमन्वितं किमपि विशिष्टं सर्जनम्। असौ गायति- मूर्खोऽस्मि मूर्खोऽस्मि तदा वदामि। सत्यमेवेतत् ईश्वर एव एको ज्ञानी वर्तते, स एव सर्वेषामपि गुरुरस्ति। लौकिकाः वयन्तु न सर्वमपि जानीमः इति लोकसिद्धमस्ति। द्वितीयं नाटकमस्ति नरेन्द्रः। अस्मिन् भारतगीतिका रम्या रचिता वर्तते।

**भारतभुवं रचयाम्यहं नवकल्पसूक्तसमन्वितम्।**
**राराज्यते यत्राधुना विज्ञानज्ञानसुभाषितम्।।**

अयं कविः प्राचीनकविविरचितमपि काव्यं यथावसरं निजसर्जने गृहीतवानस्ति। येन प्रतीयते यतदस्य श्रद्धा पुरातनकविषु कीदृशी वर्तते। यथा

**धनैर्निष्कुलीनाः कुलीना भवन्ति धनैरापदं मानवा निस्तरन्ति।**
**धनेभ्यः परो बान्धवो नास्ति लोके धनान्यर्जयध्यं धनान्यर्जयध्यम्।।**

अत्र वणिक्स्वामिजीवयोः संवादो मनोहरो विभाति। अनेनैव प्रकारेण तृतीयं नाटकं संगीतसाहित्ययोरभेदत्वमस्ति, शुभ्रमार्गभ्रष्टानां संस्कृतमेवाश्रयः, आत्मविश्वासः, कर्मभूमिः, संस्कृतकक्षा, विवाहोपायनम्, टका धर्मः टका कर्म, सम्भाषणशिविरकक्षा, कीट्टीपार्टी, पिशाचवाचकम्, इति द्वादशनाटकानि सन्ति। ततः चत्वारि एकांकिनाटकानि यानि संस्कृतस्य प्रचारः प्रसारः कथम्? वनदेवीबालसंवादः, संस्कृते बाबूरावः, शाकापणः इति कृत्वा षोडशकृतीनामेष संग्रहो मनोरमो वर्तते।

आधुनिकसंस्कृतजगते अयं रूपकसंग्रहः संस्कृतसंस्कृतिसमाजसंरक्षणधिया नूनमेव प्रकाशं तनिष्यतीत्यहं वक्तुं शक्नोमि। परिशीलयिष्यन्ति समीक्षकचणाः पठिष्यन्ति पाठकाः सोल्लासमिति भावयन् अस्मै कवये सानन्दमनन्ताः शुभकामनाः प्रयच्छन् अभिनवां कृतिमिमामस्य प्रशंसन् सुरभारतीं भावयन् प्रसीदामि।

रंगभर्य्येकादशी २०७९

अमरवाणीसेवकः

साहित्य-अकादमीपुरस्कारपुरस्कृतः, बाणभट्टपुरस्कारपुरस्कृतो बालकविररविन्दकुमारतिवारी, अमरवाणीकविपरिषत्परिकल्पकः।

# भारतं ज्ञातुम् इच्छन्ति चेत् संस्कृतस्य ज्ञानम् आवश्यकम् - रंगराजन कुमारः

वार्ताहरः - सचिन शर्मा , लखनऊ , उ.प्र.

यदि भवन्तः भारतं ज्ञातुम् इच्छन्ति तर्हि तस्य कृते संस्कृतस्य ज्ञानम् अत्यन्तम् आवश्यकं वर्तते इति उत्तरप्रदेशसंस्कृतसंस्थानस्य



प्रशिक्षकः रंगराजन कुमारः छात्रान् बोधितवान् ।

उत्तरप्रदेशसंस्कृतसंस्थानेन द्वारा संचालित ग्रहे ग्रहे संस्कृतम् इति योजनायाः अंतर्गते जनाः संस्कृतसम्भाषणं कर्तुम् अधिकाः उत्साहिनः जिज्ञासुकाः इच्छुकाः च सन्ति । अस्मिन् वर्गस्य समापनसमारोह उच्च प्राथमिक विद्यालय ग्राम चान्दनायां अभवत् । इदम् एतिहासिक-क्षणं वर्तते । विद्यार्थिनः संस्कृतं पठन्ति सम्भाषणं कुर्वन्ति च ।

एते सर्वैपि संस्कृतक्षेत्रे निश्चयेन किमपि नूतनं प्रयोगं करिष्यन्ति। संस्कृतसेवां करिष्यन्ति । पुनः राष्ट्रे विश्वे च संस्कृतस्य प्रचारं-प्रसारं च करिष्यन्ति। एतस्याः कल्पनायाः इच्छायाः आवश्यकतायाः च बीजारोपणं प्रयत्नं च करोति । भाषाप्रशिक्षकः श्रीमान् रंगराजनकुमारवर्यः। प्रशिक्षकमहोदयः एतेषां व्यवहारे आचरणे च संस्कृतम् आनेतुं प्रयत्नं करोति। पठतु संस्कृतम्, जानातु भारतम् ।

# आवासीय-सरलसंस्कृतभाषाशिक्षकप्रशिक्षणवर्गस्य समापनकार्यक्रमः सम्पन्नःउत्तरप्रदेशसंस्कृतसंस्थाने

वार्ताहरः - सचिन शर्मा , लखनऊ , उ.प्र. ।

उत्तरप्रदेशसंस्कृतसंस्थाने आवासीय-सरलसंस्कृतभाषाशिक्षक-प्रशिक्षणवर्गस्य समापनकार्यक्रमः सम्पन्नः। कार्यक्रमस्य आरम्भे दीपप्रज्ज्वलनम् अभवत्। तत्र आकाशः आदित्यः करुणेशः च मन्त्रम् उक्तवन्तः । तपोभूमिः गुरूकुलस्य वटुकाः वैदिकमङ्गलाचरणं कृतवन्तः। सरस्वतीवन्दनां श्रेया सीमा च कृतवती। तदनन्तरं श्रेया सीमा शीला च संस्थानगीतिकां गीतवत्यः । योजनासमन्वयकः राधाशर्ममहोदया सर्वेषाम् अतिथिनां परिचयं कारितवती। कार्यक्रमैस्मिन् मुख्यातिथिरूपेण संस्थानस्य निदेशकः विनय श्रीवास्तववर्यः , लखनऊ विश्वविद्यालयस्य प्रो. ओमप्रकाशपाण्डेयः , प्रो. उमारानी , डॉ. रेखाशुक्ला, प्रो. अभिमन्युः , डॉ.गौरवः इत्यादयः उपस्थिताः आसन् । संस्थानस्य प्रशासनिक-अधिकारी जगदानन्दझावर्येण उत्तरप्रदेशसंस्कृतसंस्थानस्य परिचयः कारितः । गीतावशिष्ठमहोदया वर्गस्य स्वस्य अनुभवम् उक्तवती । पुनीतमहोदयेन संस्कृतेन " आत्मा




अलङ्करणीयः न तु शरीरम् " इति नाम्ना एका प्रेरणाकथा उक्ता । प्रो.ओमप्रकाशपाण्डेयमहोदयेन उक्तं यत् संस्कृतं समाजस्य भाषा वर्तते । इदं संस्थानं सर्वत्र संस्कृतं प्रसारयति। प्रो.अभिमन्युमहोदयेन बोधितम् यत् संस्कृते सर्वं निहितं वर्तते। देशस्य समाजस्य च विकासः तदैव भवितुम् अर्हति यदा वयं संस्कृतेन आचरामः । प्रो.उमारानी त्रिपाठीवर्या उक्तवती यत् एषा "गृहे गृहे संस्कृतम्" योजना संस्कृतेन सम्भाषणं कर्तुं सर्वान् प्रेरयति । डॉ.गौरवसिंहवर्यः संस्कृतस्य उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालिता च अस्याः योजनायाः प्रशंसाम् अकरोत् उक्तवान् च एषा योजना निरन्तरं चलेत् । रेखाशुक्लामहोदया अपि संस्कृतस्य विशेषताम् उक्तवती । कार्यक्रमैस्मिन् काश्चित् बालिकाः संस्कृतेन नाटकम् अपि कृतवत्यः। वर्गैस्मिन् प्रशिक्षणप्रमुखः सुधिष्ठमिश्रः, धीरजमैठाणी, दिव्यरञ्जनः , राधाशर्मा , अनिलगौतमः च इतौपि अन्ये शिक्षकाः सचिनशर्मा, डॉ. स्तुतिगोस्वामी , डॉ. श्वेताबरनवालः , धनञ्जयः , विमलेशः च प्रशिक्षणं दत्तवन्तः। सम्पूर्णवर्गे ये जनाः प्रशिक्षणं प्राप्तवन्तः। ते आहत्य ५२ जनाः सन्ति। २७ पुरुषाः २५ महिलाः च एते सर्वैपि इतः प्रशिक्षणं प्राप्य अन्यान् छात्रान् पाठयिष्यन्ति।

# उत्तराखंडविद्वत्सभा द्वारा समायोजितः वार्षिक-पत्रिकाविमोचनकार्यक्रमः -श्रीदिनेशप्रसादभट्टः

पटेल नगरम्- 'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु' द्विजेभ्यः अत्यंतम् अनिवार्यतया शास्त्रेषु निर्दिष्टयोः मान्य अध्यक्ष श्री विजेन्द्र प्रसाद ममगाईवर्यस्य मार्गदर्शने संध्योपासन कर्मणो गायत्र्याश्च महत्वं प्रतिपादयितुं सभायाः अमृत कुंभ स्मारिकायाः संवत् २०८१ तमं १५




संस्करणं सम्पादक श्री सत्यप्रसादसेमवालस्य नेतृत्वे विभिन्न विदुषां लेखकानां संपादकीय मंडल सदस्यानां समेकित प्रयत्न द्वारा प्रकाशितस्य गायत्री विशेषांकस्य विमोचनं पूर्व सम्पादकानां सम्मान समारोहश्च श्री मन भावन पेलेस , पटेल नगरे , देहरादूने समस्त संरक्षक मंडलस्य सन्निधौ कोषाध्यक्ष श्री अजय डबरालेन सहित समस्त पदाधिकारिणां कार्यकारिणी सदस्यानां सौहार्दपूर्ण सहयोगेन च संपन्नौ। मुख्यातिथिरूपेण डॉ मोहन लाल जोशी, सभाध्यक्षः श्री विजेन्द्र प्रसाद ममगाईं , डा राम लखन गैरोला , डा राम भूषण बिजल्वाणः, आचार्यश्रीपवन शर्मा, भूतपूर्वाध्यक्षः पं उदयशंकर भट्ट, श्री जयप्रकाश गोदियालः, संपादक श्री सत्य प्रसाद सेमवालः , आचार्य जयदेव सुन्दरियालः , आचार्य श्रीचंद्रप्रकाश ममगाईं, आचार्यश्री हर्ष पति गोदियालश्च मञ्चम् आरुह्य स्व वक्तव्येन गायत्री महिमानम् उल्लिख्य कार्यक्रमस्य शोभां वर्धितवन्तः पत्रिका विमोचनम् अकुर्वन्। अन्येषु समागतेषु अतिथिषु वैदिक ब्राह्मण ऋषिकेशस्य अध्यक्ष श्री मणिराम पैन्यूली , कोषाध्यक्षश्री शिवप्रसाद सेमवालः, नेपाली ब्राह्मण सभायाः पदाधिकारिणः कार्यक्रमस्य शोभां वर्धितवन्तः। सरस्वती समर्चनया दीप प्रज्ज्वलनेन कार्यक्रमस्य शुभारंभः जातः। सभा माल्यार्पण द्वारा अतिथीनां स्वागतम् अकरोत्। मुख्यातिथिः डॉ मोहन लाल जोशी, सभाध्यक्षः आचार्य विजेन्द्र ममगाईं पूर्वसम्पादकान् पं. उदय शंकर भट्टः, पं. सुभाष जोशी, पं. भरतराम तिवारी, पं. जयदेव सुन्दरियालः, पं. चन्द्र प्रकाश ममगाई, पं. डा. संदीप रतूड़ी, पं. जयप्रकाश गोदियालः, पं. हर्षपति गोदियालः, पं. नरेश सुन्दररियाल , पं. सुभाष चमोली, पं. विपिन डोभालः च इत्येतान् पत्रिका सम्पादन गत पुरुषार्थस्य उल्लेखपूर्वकं माल्यार्पण-अंगवस्त्र-प्रशस्ति पत्र-प्रदानेन पुरस्कृत्य सम्मानितवन्तः। मञ्चसञ्चालनं आचार्येण दिनेशप्रसादभट्टेन कृतम्। भूतपूर्व महासचिवस्य चंद्र प्रकाश ममगांईवर्यस्य प्रेरणया मन भावन प्रतिष्ठानस्य प्रबंधकः श्री उमेश मिनोचा सभायै स्थानं कल्पितवान्। कार्यक्रमस्य अवसाने समुपस्थित विद्वज्जनाः अल्पाहारं कृत्वा परस्परं शुभकामनाः अयच्छन्। अस्मिन् अवसरे १०० तः अधिकाः भूतपूर्व पदाधिकारिण, कार्यकारिणी सदस्याः त आजीवन सदस्याः, आध्यात्मिक जगतः सामाजिक जनाः , मनभावन प्रतिष्ठानस्य प्रबंधकः इत्येतैः सहिताः समस्त कर्मचारिणः, सहसचिवः श्री मरलीधर सेमवालः, प्रवक्ता श्री मुकेश पन्तः, लेखा निरीक्षकः उमेश प्रकाश भट्टः, परामरकः श्री राजेश अमोली, श्री रविन्द्र डंगवालः, श्री मुकेश कौशिकः, श्री आदित्यराम थपलियालः, श्री दीपक अमोली, श्री राजेश्वर प्रसाद सेमवालः, श्री भुवनेश चंद्र थपलियालः, श्री परशुराम उनियालः श्री धीरज मैठाणी, अन्ये च आजीवन सदस्याश्च समुपस्थिताः ।

# एकादशी तिथीया तृतीया श्रीमद्रामाश्रिता व्याख्यानगोष्ठी सम्पन्ना

चातुर्वेद-संस्कृतप्रचार-संस्थानम् काशी द्वारा हिन्दी-संस्कृतविभाग-डॉ. हरीसिंहगौरविश्वविद्यालयः सागर-मध्यप्रदेशः एवं देवनागरी-स्नातकोत्तर महाविद्यालयः, गुलावठी, बुलन्दशहर-उ.प्र. इत्यनयोः संयुक्ततत्त्वावधाने एकादशी तिथीया तृतीया श्रीमद्रामचरिताश्रिता



व्याख्यानगोष्ठी फाल्गुनशुक्लपक्षस्य रङ्गभर्यामेकादश्यां सुसम्पन्ना। सर्वादौ विहितं वैदिकं मङ्गलाचरणम् आचार्यशिवममिश्रेण, पौराणिकं शोधार्थिन्या दिव्यया च। समन्वयकवर्येण प्रो.आनन्दप्रकाशत्रिपाठिना बीजवक्तव्यपूर्वकं स्वागतं कृतम्। विशिष्टवक्ता मुम्बई विश्वविद्यालयीयः, हिन्दीविभागाध्यक्षः प्रो.करुणाशङ्कर उपाध्यायवर्यो वर्तमानसन्दर्भे महर्षिवाल्मीकेः गोस्वामिनः तुलसीदासस्य च रामः, इतिविषये प्रोवाच यद्वाल्मीकेः रामः अस्माकं सनातनधर्मावलम्बिनां सांस्कृतिकं व्यक्तित्वमस्ति, समरसतायाः प्रतीकः, धर्मस्य साक्षाद्विग्रहः, शक्ति-शील-सौन्दर्यादीनां समुच्चयोस्ति। तत्रैव तुलसीदासस्य रामः भूपालचूडामणिरस्ति। धर्मध्वजरक्षकः, लोकमङ्गलप्रदायकः, मानवीयगुणानां दर्शनीयं तत्त्वमस्ति। दारिर्द्यदशाननविनाशकोस्ति। एतद्वयमपि स्वरूपं लोकानुग्रहकारकमस्ति। अत एव रामवज्जीवनं, रामराज्यादिकं कल्पनीयं भवति।

मुख्यवक्ता एवं सभाध्यक्षः प्रो.श्रेयांशद्विवेदी संस्थापककुलपतिः महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयः कैथल-हरियाणा, वाल्मीकिरामायणमाश्रित्य राम-अगस्त्यसंवादविमर्शः, इतिविषयमाश्रित्य विशेषेण राक्षसकुलसमुद्भवं, नामकरणादिकञ्च प्रोवाच । धन्यवादज्ञापनं संयुक्तसंयोजकः डॉ. हरिदत्तशर्मा कृतवान्। गोष्ठ्याः सञ्चालनं संयोजकः डॉ. चन्द्रकान्तदत्तशुक्लः सम्पादितवान्। शुभकामना-शान्तिपाठेनसह गोष्ठ्याः सम्पूर्तिर्जाता। अवसरेस्मिन् डॉ. प्राङ्गेशकुमारमिश्र, डॉ. अभिषेकपाण्डेयः, डॉ. आभाद्विवेदी, डॉ. नेहामिश्रा, डॉ. विपिनद्विवेदी, डॉ. सन्ध्या ठाकुरः, डॉ. अरविन्दतिवारी, डॉ. खगेन्द्रमिश्रः, डॉ. सर्वेशशाण्डिल्यः, महकमौर्या, प्रियंका यादवः, अनन्या श्रीवास्तवा, शालिनी कश्यप, प्रिया विश्वकर्मा, आंचलगुप्ता, अनामिकासिंह-प्रभृतयः नैके समुपस्थिता आसन्।

# डॉ.बाजश्रबा आर्यः उत्तराखंड-संस्कृतअकादम्याः सचिवः जातः



हरिद्वारम् – उत्तराखण्ड संस्कृत अकादम्याः सचिव पदस्य अतिरिक्त प्रभारं डॉ. वाजश्रवा आर्यः, सहायक निदेशकः, (संस्कृत शिक्षा) बुधवारे गृहीतवान् । अवसरेस्मिन् संस्कृत अकादम्याः, संस्कृत शिक्षा निदेशालयस्य, संस्कृत शिक्षा परिषदः अधिकारिणः कर्मचारिणः डॉ. आर्यस्य स्वागत-सम्मानम् अभिनन्दनं च कृतवन्तः। सममेव संस्कृत विद्यालयानां, महाविद्यालयानां शिक्षकाणां , कर्मचारिणः गणमान्याश्च अकादमी सचिवेन सह मिलित्वा शुभकामनाः प्रदत्तवन्तः। अकादमी सचिवः डॉ. आर्यः कथितवान् यत् भविष्यं संस्कृत भाषायाः वर्तिष्यते वयं सम्मिल्य देववाणी संस्कृतस्य विकासाय सततं प्रयत्नशीलाः भवेम । संस्कृत भाषायां सम्पूर्णं ज्ञान-विज्ञानं समाहितम्। अवसरेस्मिन् निदशक संस्कृत शिक्षा, पद्माकर मिश्रः, अकादमीवित्त अधिकारी सत्येन्द्र डबरालः, शोधाधिकारी डॉ. हरीश गुरुरानी, प्रकाशन अधिकारी किशोरी लाल रतूडी, श्रीमती लीला रावतः, रमा कठैतः, हरीशनाथः, पंकज पालीवालः, गणेश फोन्दणी, विवेक पंतः, रजनी मलासी, आशाराम सेमवालः, दिनेश पाण्डेयः, कृष्णउनियालः, अन्जली, शालू, दिव्या, आकांक्षा, ओमप्रकाश भट्टः, सुन्दरः इत्यादयः उपस्थिताः आसन्।

# अखिलभारतीयरूपकमहोत्सवः सम्पन्नः

जयपुरम् (डॉ.रानीदधीचि)। केन्द्रीयसंस्कृतविश्वविद्यालयस्य विंशः अखिलभारतीयरूपकमहोत्सवः मार्चमासस्य षष्ठदिनाङ्कतः नवमदिनाङ्कपर्यन्तं केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे आयोजितः। अखिलभारतीयरूपकमहोत्सवस्यास्य उद्घाटनसमारोहे जयपुरस्य माननीयः पुलिसआयुक्तः श्री बीजू जी. जोसेफमहाभागाः मुख्यातिथिरूपेण समगताः आसन्। अस्मिन् कार्यक्रमे विशिष्टातिथिरूपेण जयपुरपरिसरस्य निदेशकचराः प्रो. भगवतीसुदेशमहोदयाः,




सारस्वतातिथिरूपेण राजस्थानस्य संस्कृतशिक्षाविभागस्य निदेशकचराः प्रो. सुरेन्द्रकुमारशर्ममहाभागाः, अध्यक्षाः परिसरस्य प्रभारीनिदेशकाः प्रो. रामकुमारशर्ममहाभागाः, कार्यक्रमसंयोजकाः प्रो. कुलदीपशर्ममहोदयाः च आसन्।

अस्मिन् समारोहे पञ्चदशरूपकाणां प्रस्तुतिः सञ्जाता। आदौ पूर्वरङ्गस्य मञ्चनं नाट्यानुसन्धानकेन्द्रम्, भोपालपरिसरेण कृतम्। श्रीबोधायनाचार्यकृतं भगवदज्जुकं प्रहसनस्य मञ्चनं कालीकट-आदर्शसंस्कृतविद्यापीठम्, बालूसरी, कालीकटकेरलम्, केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः हिमाचलप्रदेशः एवं च केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः, लखनऊ, उत्तरप्रदेशेन च विहितम्। कालियाचकविक्रमकिशोर-आदर्शसंस्कृतविद्यालयः हेरिया, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः लटकमेलकं प्रहसनस्य मञ्चनं कृतवान्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीरपरिसरेण महाकविवत्सराजस्य 'हास्यचूड़ामणिः' इति प्रहसनं प्रस्तुतम्। श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयः हरिद्वारेण डॉ. निरञ्जनमिश्रमहोदयस्य मर्त्यचातुर्यम् इति प्रहसनं मञ्चितम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरेण "चिपिटकचर्वणम्" प्रहसनमिदं प्रस्तुतम्। श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावल, गुर्जरप्रदेशस्य कुशीलवैः नटैः "कवित्वसङ्क्रमणम्" इति प्रहसनस्य प्रस्तुतिः कृता। केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरेण हास्यचूड़ामणिः इति प्रहसनस्य मञ्चनं कृतम्। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयः, नवदेहलीपक्षतः "पलाण्डुमण्डनम्" इति प्रस्तुतिः प्रदत्ता। कविकुलगुरूकालिदाससंस्कृतविश्वविद्यालयः, रामटेकविश्वविद्यालयेन "बण्डुः अभिनयं करोति" इति प्रहसनम् अभिनीतम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर् परिसरेण "कुहनाभैक्षवम्" इति प्रहसनं प्रस्तुतम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरेण सुन्दराजप्रणीतं "स्नुषाविजयम्" प्रहसनं मञ्चितम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरः, पुरी ओडिशापक्षतः संस्कारचरितम् एवं श्रीराजीवगान्धिपरिसरः, श्रृङ्गेरीपक्षतः श्कृपणखल्वाटचरितम्श इति प्रहसनं कुशिलवैः अभिनीतम्। अस्मिन् समारोहे युवतरङ्गसंस्कृतनाट्यदलजयपुरेण शबलिदान् (कथा पन्ना धाय री) इति विशेषप्रस्तुतिः प्रदत्ता तथा च पद्मश्रीः अनुपमाहोसकेरेमहोदयाः पुत्तलिकाप्रदर्शनमिति च प्रस्तुतिः दत्तवत्यः, आहत्य पञ्चदशरूपकाणां प्रस्तुत्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसर-आदर्शसंस्कृतमहाविद्यालय-श्रीसोमनाथसंस्कृतविश्वविद्यालय-

श्रीलालबहादुरराष्ट्रियसंस्कृतविश्वविद्यालय-कविकुलगुरूकालिदाससंस्कृतविश्वविद्यालयभ्यश्च समागताः

प्रतिभाशालिनः कुशीलवाः कृतवन्तः।

अस्मिन् रूपकमहोत्सवे पुस्तकप्रदर्शनी- संस्कृतभारतीविज्ञानप्रदर्शनी- हस्तरञ्जनी-स्वदर्शिनी- चिकित्सापरामर्श-सांस्कृतिकसंध्यादि कार्यक्रमाणामपि आयोजनम् अभवत् ।

आयोज्यमाने विंशे अखिलभारतीयरूपकमहोत्सवसम्पूर्तिसमारोहे मुख्यातिथिरूपेण माननीयाः लोकायुक्तः राजस्थानसर्वकारः श्रीमन्तः प्रतापकृष्णलोहरामहोदयाः, विशिष्टातिथिः पद्मश्रीः अनुपमा होसकेरे कार्यक्रमाध्यक्षाः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. श्रीनिवासवरखेड़ी महोदयाः आसन्। अस्य अखिलभारतीयरूपकमहोत्सवस्य मार्गदर्शकाः जयपुरपरिसरस्यनिदेशकाः प्रो. सुदेशकुमारशर्ममहाभागाः, कार्यक्रमसंयोजकाः शिक्षाशास्त्रविद्याशाखायाः अध्यक्षाः प्रो. वाई. एस. रमेश महाशयाः, सह-संयोजकाश्च साहित्यविद्याशाखायाः प्रो. रामकुमारशर्ममहाभागाः आसन्।

अखिलभारतीयरूपकमहोत्सवे मञ्चितेषु रूपकेषु प्राप्तपुरस्कारपरिसराः –

1. प्रथमपुरस्कारः–"स्नुषाविजयम्" केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, जयपुरम्।
2. द्वितीयपुरस्कारः–"कृपणखल्वाटचरितम्" केन्द्रीयसंस्कृतविश्व-विद्यालयः, राजीवगान्धिपरिसरः, श्रृंगेरी कर्नाटकम्।
3. तृतीयपुरस्कारः(संयुक्तरूपेण)–"मर्त्यचातुर्यम्" श्रीभगवानदास–आदर्श–संस्कृतमहाविद्यालयः, हरिद्वारम् उत्तराखण्डः,एवं च "संस्कारचरितम्" केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीसदाशिवपरिसरः, पुरी उड़िसा इति।

विशेषपुरस्कारः –"कविसङ्क्रमणम्" श्रीसोमनाथसंस्कृतविश्वविद्यालय, वेरावलम्, गुजरातप्रदेशः।

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः– रु. २५००/–, पञ्चवार्षिकशुक्लः रु. ११००/– (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/– (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

अस्माकं प्रेरणास्रोतः– स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः–डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।